Bhairo Pathak

Shiva rahasya : Sri Bhimakhya

शिवरहस्य : श्रीभीमाख्य Pt 8 अष्टमांशः

Sanskrit

Handwritten on paper but printed

Sambad 1938 – 137 years old

26 Folio

13.9" X 7.3"

Complete

अपूर्णांश:

श्रीगणेशायनमः॥अथश्रीशिवरहस्यअष्टमांशप्रारम्भः॥दिग्नागवृंदसहशाननतागभूषप्रेमास्पदंगमगजामुखपद्ममित्रं तनो
नुमः प्रणतविघ्नहरंगणेशमीशात्मजंशरवणोद्भववंद्यमाद्यं १ सूतउवाच जैगीषव्यः प्रणम्यान्यप्रश्नंचक्रेमुनीश्वराः स्कंदंनंदितमंदार
वृंदंसंहृततारकं २ जैगीषव्यउवाच श्रुतंतेतारकारातेआनंदवनवैभवं सहस्रनामयच्छंभोःदिव्यंरुद्रसमन्वितं क्षेत्राणांमहिमाशंभोः
शिवधर्माःसनातनाः विष्णोश्चपुष्पदंतस्यमहिम्नश्श्रुतमुत्तमं ४ सप्तमांशेकथाश्चित्राःत्वत्तःशिवतनूभव अष्टमांशेकथाःशंभोरष्टमूर्ते
वदस्वमे ५ शेषेणचतपःस्तप्तंशिवपादार्चकेणहिसर्पैश्चपूजितःशंभुरित्युक्तंप्रथमांशके कालकालकथाख्यानैःनेयःकालोधुनामया
कृपयात्वत्पदांभोजमनुलोकेवदस्वमे ७ यथात्वयाश्रुतंदेव्यावदनस्यंदिसन्मुख मच्चित्तभ्रमरोनित्यंपातुमिच्छतिषण्मुख शंभोश्चरि
त्रंपापघ्नंवदतारकसंहर त्वत्कृपापात्रभूतोयःसत्रिनेत्रप्रियोभवेत् ९ श्रुतिश्रवणभूषस्यचरित्रंपातकौघभित् वदैवश्शूरसंहारस्म
रमारप्रियात्मज १० सूतउवाच तदानींशांभवस्यास्यवचःश्रुत्वाहरात्मजः अकथिष्टोदंतमेतंशिपिविष्टकथाश्रयं ११ नागैःप्रपूजनं
शंभोर्नागभूषस्यईशितुः कद्रूसुपर्णीसंवादाद्गरुडेनपराभवः १२ शिवधर्मप्रसंख्यानंगरुडायदृढार्थदं कश्यपस्यचसंवादोगरुडेनमु
नीश्वराः १३ यथापर्णामुखंदृष्ट्वाशिवेनकथितंरहः पुण्यंशिवरहस्याख्यंमधुशैवागपुष्टिदं १४ शांभवाःषट्पदाएवतज्जिघ्रन्तुवउत्त
माः मुनिप्राहतदास्कंदोगणेंद्रानमरोत्तमान् १५ नमस्कृत्यमहादेवंअंबांहेरंबमेवच दध्यौचिरंप्रसन्नात्मासहृत्पंकजसंस्थितं १६
पुरुषंपरमेशानंसर्वभूतगुहाशयं आप्यव्यापकताहीनंकारणानांचकारणं १७ पतीनांपतिमीशानमुमापतिमनामयं गणानांचपतिं
देवंशिवंगृहस्पतिंप्रभुं १८ कुलुंचानांपतिंशंभुंहरंव्रातपतिंविभुं दिशांचपतिमीशानंउग्रंदेवंकपर्दिनं १९ अंबिकेशंपशुपतिंपथीनां
पतिमीश्वरं अन्नानांचपतिंदेवंबभ्लुशंमीढुषंशिवं २० भवोद्भवंमहादेवंपुष्टानांपतिमीश्वरं जगतांपतिमाशासंवनानांचपतिंभवः
२१ क्षेत्राणांचपतिंभीमंवृक्षाणांशर्वमीश्वरं कक्षाणांचपतिंव्योमकेशंक्लेशादिवर्जितं २२ जगतांचैवविश्वेशमोषधीनांमहेश्वरं पतीनां

एमः

मेरुधनुषंसत्वानांवाणधारकं २३ सहमानंमहेशानमाव्याधिपतिमीश्वरं सर्वेषांतस्थुषांनांचजंगमानांपतिंप्रभुं २४ सर्वैश्वर्येणसंप
न्नंनाम्नासर्वेश्वरंशिवं अनामरूपंदेवेशंसर्वावासंचदूरगं २५ सर्वभूतेषुशरणंशरण्यंशरणार्थिनां महाकारुणिकंसांबंभक्तानामभय
प्रदं २६ सर्वेंद्रियार्थरहितंविषयादिविवर्जितं सर्वेंद्रियगुणातीतंसर्वाधारमनोपमं २७ सर्वस्यप्रभुमीशानंनान्यत्किंचिदमंस्तवै ध्या
त्वाहृत्पंकजेदेवमुमयासहितंशिवं २८ सर्वेंद्रियार्थरहितंमहानंदांबुमग्रधीः अवशेनजगादेदंस्कंदोनंदांबुमग्रधीः २९ स्कंदउवाच
लोकानुग्रहविग्रहत्रिजगतांसंहारकोग्रप्रभोग्रस्तंमामहिनेवसोमममगजाकांतास्तुपापात्मना भक्तंचापिभवाननुग्रमनसापश्याद्यनिग्रा
ह्यमप्यग्राह्यंशशिशेखरार्चकमहंग्राह्याग्रगण्योनकिं ३० आतार्यालाद्यशंभोभवहरभगवन्रुद्रभर्गत्रिनेत्रभीमोग्राध्वरदक्षपक्षसुरा
मीक्षाभुजांशिक्षक उक्षाधीश्वरंवाहकस्त्ववसतेशंभोभगाक्षिक्षयध्वांक्षाक्षिप्रभदक्षदीक्षितमहादीक्षाविनाशावमां ३१ इतिश्रीशिवरह
स्यभीमाख्येअष्टमांशेजैगीषव्यप्रश्नेस्कंदध्याननामप्रथमोध्यायः ॥१॥ श्रीस्कंदउवाच श्रुणुतूर्णंकृपांभोधेः कथाख्यानंमुनीश्वर जै
गीषव्यमहाशैवजितषड्वैरिविक्रम १ पंचेषुमत्तमातंगहरपंचास्यविक्रम. संपूर्णैवमहेशस्यकृपापूर्णार्णवस्थिर २ अपर्णारमणार्चातो
भवानभ्यर्णएवहि मयाषड्वदनांभोजश्रवणैः श्रुतमैश्वरं ३ माहात्म्यंपरमेशस्यमहिमानंमहाघभित् देवमुत्फुल्लमुखांभोजमरंदस्यंदिसुंदरं ४
पुण्यंशिवरहस्याख्यंमधुपुत्तममुत्तमं अमृतादपिविप्रेंद्रसारभूतमिदंध्रुवं ५ किंचामृतस्यपानेननैवमुक्तिर्भविष्यति एतच्छिवरहस्या
ख्यामृतपानंविमुक्तिदं ६ त्वमेवपात्रंविप्रेषुश्रवणेतेधृताभतिः अमीगणेंद्राविप्रेंद्रासुरेंद्राश्चयथासुखं ७ आनंदघनकंदस्यमहिमानं
महेशितुः अस्मिन्नंशेमहादेव्यैमहेशेनोपवर्णितः ८ भीमोष्टमांशःकथितोदेवेशस्यप्रसादतः भीमेनकथितोदेव्यैअघोरास्येनशांकर ९
श्रुणुकर्णसुखाख्यानंसहैभिर्मुनिपुंगवैः चरित्रंतत्त्रिनेत्रस्यपवित्रंपापनाशनं १० विचित्रंपुण्यदंस्वर्ग्यंस्मरणादस्यसत्तम शृण्वतांश्रवणैः
तूर्णंमुक्तिरेवभविष्यति ११ निस्तीर्णःसतुसंसारात्भवोद्भवकृपारसैः भविष्यत्येवसहसाभीमपादांबुजाश्रयात् १२ यामहेशकथासिंधुतरं

गाह्लाविमानसः स्वमनःपद्मसद्मोत्थसंफुल्लानंदमेदुरः १३ भवेज्जन्मसहस्रेषु कश्चिच्छंभवसत्तमः मृतोभवानीरमणपदध्यानहताशुभः
भवत्पत्संतभाग्यायभवनाशायकेवलं भुक्तिमुक्तिप्रदंपुंसामेतस्यश्रवणंसदा १५ योशस्याध्यायपादंवाश्लोकार्धंश्रुणुयाद्यदि सएवशांभवोलोके
सदाशर्वपदाश्रयः १६ इदमेवपरंश्रेयोमंगलानांचमंगलं मंगलापत्तिपादाब्जभक्तिदंमुक्तिसेतुदं १७ अमंगलहरंपुंसांपुनर्थदमनुत्तमं इदंशि
वरहस्याख्यंशशिशेखरभाषितं १८ देमेदेवेनकथितमस्त्वमूर्तिप्रियंसदा नाशांभवेश्राव्यमेतद्भावैःश्राव्यमिदंमुने १९ अशांभवेवदन्विप्रोशिव
द्रोहमवाप्नुयात् पुराचित्ररथोनामगंधर्वाधिपतिःकिल २० वीर्यवान्बलसंपन्नःसदास्त्रीजनवत्सलः तरुणोरूपसंपन्नःगाननृत्तविशारदः २१
पुष्पकेनसदाविप्रसपक्षेणमुदासदा पर्यटन्पृथिवींचैवसुरलोकेषुसत्तमः २२ सगंधर्वकुलश्रेष्ठोददर्शाश्रममुत्तमं मुंजपृष्ठेसदारम्यफल
पुष्पद्रुमाकुलं २३ लताविताववहुलंमृगपक्षिगणाकुलं हौंडिर्नाममुनिस्तत्र उवासशिवभावनः २४ भस्मरुद्राक्षसंपन्नःत्रिपुंड्रोज्वलफालकः
फालाक्षध्याननिरतोशर्वार्चनपरायणः २५ तादृशेरेवमुनिभिराहृतोहारसत्तमैः तस्यासीद्रूपसंपन्नाकन्याकमललोचना २७ रूपयौवनसंपन्ना
सदासौदामिनीवदा तांदृष्ट्वारूपसंपन्नांचकमेकाममोहितः २८ पितुर्लिंगार्चनार्थायपुष्पापचयतत्परां वनवाटीषुरंम्यासुरहोवाचास्तविक्रमः
२९ गंधर्वउवाच अयिरंभोरुकासित्वंकस्यकन्यावदस्वमां तवाद्यसंगमंपाचेपुफुल्लासुवनराजिषु ३० कुसुमेषुशरार्त्तंमांपरित्रातुमिहार्हसि
इत्युन्मत्तवचःश्रुत्वागंधर्वस्यद्विजात्मजा ३१ तमाहकंम्रवदनाभीताचालोकयद्दिशः कन्योवाच हौंडेरहंशांभवस्यकन्यागंधर्वसत्तम त
मेवशरणंगच्छनदादिश्शात्वयासह ३२ समंत्रदत्ताकन्याहंत्वांवरंवरयेपतिं इत्युक्तंसततदाश्रुत्वातामाकर्षितुमागतः मूढोदृढंशरैर्विध्यो
मारस्यनितरांमुने साभीताप्राद्रवद्दूगात्यक्त्वापुष्पाणिकन्यका ३४ पित्तरंसाश्रुपूर्णाक्षीप्राहगंधर्वचेष्टितं तदासशांभवोहौंडिःशशापमुनि
सत्तमः ३५ मुनिरुवाच यस्मान्मत्कन्यकांपापप्राधर्षीःकाममोहितः अपस्मारगृहीतस्त्वंभवेतिमुनिराहहि ३६ सगंधर्वोमुनिःशापान्मदो
न्मत्तोविचेतनः बभ्रामसपिशाचार्तोवदन्नुन्मत्तवत्तदा ३७ सखातस्याभवद्विप्रतुंबरुःशिववल्लभः कैलासेशंकरंनत्वातस्यनिष्कृतिमाहवै ३८

तुंबुरुरुवाच शंभोविश्वेशविश्वात्मन्सखाचित्ररथोमम तेनशंभवर्वर्यस्यकन्यापहृतचेतसा ३९ अनुशिक्षितमिदंशंभोत्तमुत्सरमहेश्वर भग
वानपिदेवेशःतुंबुरुंप्राहहर्षितः ४० ईश्वरउवाच मद्रोहशंभवद्रोहौउभौतुल्यौहितुंबरो तस्मात्त्वज्ञापितःप्रीत्यातद्गंधर्वविमोचने ४१ उपायमेकंक
थयामिमन्नाम्नास्मृतिमात्रतः अपस्मारग्रहान्मुक्तःसभविष्यतितुंबुरो ४२ इत्थंशंभोर्वचःश्रुत्वासप्रणम्यमहेश्वरं ययौचित्ररथोयत्रस्थितोप
स्मारसंयुतः ४३ उन्मत्तभूतोविकृतःकरालोन्नतकेशवान् तवध्यावल्लकीहस्तोजगौकर्णरसायनं ४४ तुंबुरुरुवाच शर्वगर्वपरिपूरितकामलोम
वाणविनिवारकशंभो त्वत्पदाब्जकुलनेननकालःकामकायदमनाव्ययमूर्ते श्रीमत्त्र्यंबकसदाशिववेदवेद्यवैद्योत्तमप्रमथनाथसुरासुरेड्य
विश्वनाथममनाथपाहिमुंपापतापदंदंघमीशशंभो ४५ स्वर्णवर्णकृतनेत्रकर्णजापारहारगगनांतरसंस्थ ऊर्णनाभिरिवतद्गलमेतज्ज्ञागतंविसृजसे
शिवतूर्णं ४६ शंकुकर्णभरितस्तुतिजातैःभद्रकर्णकृतशंखनिनादैः नंदिवाद्यभरतानुगतालैःनृत्तरंगमपिनेदृदयांतः ४७ इत्थंतत्स्तुतिजा
तेनवीतपापोभवत्क्षणात् सतुचित्ररथोविप्रक्षणाद्गंधर्वरूपधृक् ४८ एवंकथाप्रभावेननाम्नाशंभोःप्रभावतः नंदिभृंगपादयोप्येवंसमाराध्यमहे
श्वरं ४९ गणेशत्वंचसंप्राप्यमोदंतिशिवसंन्निधौ तमाहविनयानम्रंनंदिकेशंमहेश्वरः ५० श्रीईश्वरउवाच स्कंदोविघ्नाधिपोवानवसदृशगुणं
नाभिनंदामिनंदिन् विश्वानंदप्रदस्त्वंममतनयवरोदेवसंघैकवंद्यः गौर्याश्चापिप्रियस्त्वंतवशतयजुषासारजप्यैःप्रियंमां विद्धित्वय्येवर
क्तंगणवरविनुतंसत्यमद्याब्रुवेहं ५१ मत्सारूप्यधरोवसात्रहृदयद्वारेचकैलासकेकुर्वन्मेगणपुंगतामधिगतःस्वर्णात्तवेत्राग्रधृक् विष्णुब्रह्म
महेंद्रमुख्यमकुटीनीराजिताज्ञाहितेलोकेषुप्रचरिष्यतिप्रतियुगंत्वंमेशरीरंपरं ५२ नंदीउवाच भस्माभ्यक्ततनुर्भवेत्भसितयुक्पुंड्राकगा
त्रोभवेभावोक्षादिविभूषितःशिवमनुव्याहारमात्रादरः रुद्राध्यायजपानुरक्तहृदयोलिंगार्चनासादरोभूयांजन्मशतेषुएषविहितःत्वत्पादप
द्मेंजलिः ५३ इत्थंनंदिवचस्सुनंदितहृद्हासेराननःशंकरः प्राहानंदभरेणवाक्यमधुनासंवीक्ष्यपूर्णोदितं तन्मध्येस्वकरांबुजंचविदधत्तुच्चैर्वदंतंहरःसर्वे
षामुपशृण्वतांसुरगणेंद्राणांमुनीनामपि ५४ एवंप्रदक्षिणविधौनिरतःसभृंगीभृंगोपमोरविरिवोदयपर्वतेंद्रं सुसमाचतोष्यभगवंतमुमासहायंलेभेगणेंद्रपदवीमदवीयसीं ५५

स्कंदउवाच पुंसांपुमर्थदमनुत्तममीशपादध्यानानुरक्तहृदयैःपरिसेवनीयं मान्यंचवर्यमिदमेववदान्यधुर्यमाधुर्यधैर्यवचनैःपरमेवसारं पुण्यं
परंशिवरहस्यमधुप्रकृष्टउत्कृष्टभक्तिजनकंशिपिविष्टपादे कष्टानिनाशयतितुष्टमिदंददातिपुष्टिंप्रयच्छतिसदैवविमुक्तिसृष्टिंः ५७ भ्रष्टश्रियामपि
सदैवतनुप्रकृष्टमुत्कृष्टराज्यपतनयाधिकसौख्यदायि किंभोगभाग्यनिकरैःवरदंतिवृंदैःवाज्युत्तमैःवरस्थैःधनधान्यगोभिः किंनश्वरैर्वरमहेश्वरभक्ति
भाववांछंतिनैवसुकृतैरकृतैःकृतार्थाः ५८ इतिश्रीशिवरहस्यभीमाख्ये अष्टमांशेचित्ररथशापनिवृत्तोद्वितीयोध्यायः॥२॥श्रीस्कंदउवाच
शृणुत्वमगजाकांतपादभक्तिविवर्धनं भवभक्तिकथादारंवरंमधुमहार्घभित् हृत्तमोवारणंसद्यःमुक्तिकारणमद्भुतं त्वत्तोनपात्रमेतस्यग्रहणेधारणे
मुने २ रहस्यमेनद्भगवानगजापतिरेवहि कैलासेस्वांकसंस्थायैप्रीत्याप्राहसशंकरः ३ तदंतिकस्थेनमयाश्रुतमेतद्वदामिते अष्टमूर्तेःप्रियंचैतदष्टमां
शमिदंतव कथयिष्येमुनिश्रेष्ठशृण्वेभिर्मुनिपुंगवैः श्रवणेवद्धतोसित्वंभवानेवमनोद्यमे ५ कस्यचित्तमिहैकाग्र्यमुग्रारम्यानंमनोहरं भावानांभवशांसथे
भवेनैवप्रकाशितं ६ भवोद्भवचरित्रेषुविश्रांतांकिलशंकरः अविश्रांतमुमाकांतकथयाश्रांतिवर्जिताः ७ भवतांनाअपिसदानितरांशंतमानसाः
क्षणंत्वस्यप्रसादेनकुरुकर्णेकथारसं ८ तूर्णमप्यपवर्गगामुक्तिःभविष्यतिकृपावशात् शंभोर्विचित्रलीलस्यमहेशस्यपिनाकिनः ९ सगौरीहृदयानंदआ
नंदांबुनिधिःशिवः भक्त्याभक्तैस्तुतोनित्यंवेदवेद्योमहेश्वरः १० ददातिमोक्षसाम्राज्यंप्राज्यंदेवशिखामणिःराज्यंचाशिवभक्तानामन्नमाज्यप्लुतंस
दा ११ वाणीपतेरयंप्रादाद्वैदुज्ज्वालंकृपावशात् शर्वाणीपतिरेवाद्यचारुचंद्रलसच्छिराः १२ रमारमणतामीशःसगौरीरमणोहरः ददात्येवहिभक्ते
षुशंभवेषुकृपावशात् १३ सएवगीयतेवेदैर्वेदांतैरपिशंकरः सएवसर्वदेवेशोमृत्युंजयउमापतिः १४ सएवभगवाञ्छंभुःश्रुतश्चाथर्वणेशिवः यस्यैश्व
र्यस्यनांतोस्तिसर्वगःसर्वदाप्रभुः १५ यध्यानेनपरामुक्तिःसुलभाशांभवोत्तमे सगौरीरमणोदेवःकालकामांधकाशनः १६ सतुमृत्युंजयोनित्यमपार
विभवाश्रयः यस्यप्रसादलेशेनविष्णुब्रह्मेंद्रपूर्वकाः १७ धिष्ठितानिवृत्ताःसर्वेशिपिविष्टपदार्चकाः उदारतरगंभीरोभवमायाभयापहः १८ सर्वदुः
खहरोदेवोरुद्रोवैनीललोहितः यएनंविदुरीशानममृतास्तेसदामुने १९ अंतेदुःखमेवप्राप्नुवंतिपदेपदे यस्यवामांकगादेवीपार्वतीसर्वेश्वरीशिवाय

न्मायथोमोहितावेत्रह्मेंद्राश्च। अधोक्षजः यस्याः प्रसादलेशेनविजानंतिमहेश्वरं २१ स्वात्मानंसर्वगंशांतंसच्चिन्मयमुमाधवं यस्यपुत्रोगण।
धीशः सर्वविघ्ननिवारकः यस्यपुत्रोहमेवाद्यसाक्षात्ता नान्यकोमुने यस्यनंद्यादयोविप्रगणाःशंकरपुंगवाः २२ यस्यधर्मोमहाबाहुः युगपादोमित
द्युतिः यस्य। अष्टमूर्तिभिर्व्याप्तंजगदेतच्चराचरं २३ यस्यलिंगंसदाकालंपूजयंतिमरुद्गणाःखलप्रमथनंसांबंभक्तसंसारमोचकं २४ कारणंजगतामी।
शमानंदघनमद्वयं योवैरुद्रोमहादेवःभूतंभव्यंभवज्जगत् २५ योवैरुद्रोमहादेवःशंकरःशशिशेखरः विश्वंभूतंचभवनंविचित्रंसहिशंकरःभीमो
रुद्रोमहेशानोगीयतेश्रुतिषुस्थिरः २६ सर्वाभयप्रदोविश्वोविश्वाधिकउमासखः पतित्वेनस्तुतोवेदैःसर्वेषामेमेवशंकरः २७ भयापहोयंभक्तेषुशं।
भवेषुमहात्मसु सर्वोपास्योयमेवात्मासर्वेषांहृदयांतरः २८ सर्वभूतगुहावासःवासिताजगतांत्रये ईशावास्यमिदंसर्वंजगत्त्रिभुवनात्मकं २९
यस्यरूपंचपृथिवीसूर्याचंद्रमसोमुने पृथिवीदेवताःसर्वाःनविदंतिमहेश्वरं प्रियोयंसर्वभूतेषुनास्त्यस्माज्जगदेवहि श्रीस्कंदउवाच वभ्रा।
जमानमिदमेतदद्भ्ररूपमुद्भ्रांतचित्तकुदृशाजगदेवसत्यं विभ्राजतेभ्रच्छदिवहृदभ्रगोष्ठीनरस्यचरणाचेनहीनदृष्टेः ३१ नोविष्णुर्नोविधा।
ताहरिसुरनिकराभूसुराभासुरायेवीराबाप्यसुरासुकिन्नरवराःसंसारकारागृहे भ्राम्यंतोपिनजानतेशिवपदंकिंतुप्रसादाद्विभोः नोविभ्यंतिभ
येषुशंकरपदध्यानानुरागादराः ३२ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेतृतीयोध्यायः॥ ३ ॥ श्रीस्कंदउवाच विज्ञानात्मापरात्मायंसर्वात्मा।
यंमहेश्वरः एषोंतर्हृदयारामोएषभूतपतिःशिवः १ सएषपरमानंदोरसोयममृतोहरः एषविप्रेमहादेवःसर्वदाभिस्तुतोमुने २ येनमेकेवरंसम्यं
ब्रह्माणंहरिशक्रकं एकोरुद्रोमहादेवोनद्वितीयोस्तिकश्चन ३ ऋतंसत्यंपरंब्रह्मपुरुषःकृष्णपिंगलः ऊर्ध्वरेताविरूपाक्षोविश्वरूपोमहेश्वरः४
योवेदादौस्वरःशंभुःवेदांतेषुप्रतिष्ठितः ईशानःसर्वविद्यानांसर्वभूतादिरीश्वरः ५ ब्रह्मविष्ण्वादिदेवानामधिपोविश्वतोमुखः जनिताब्रह्मविष्णूनां।
रुद्रेंद्राणांमहेश्वरः यमानिलानलार्काणांदिवःपृथ्व्योर्महेश्वरः योंतरापृथिवीदेवंपृथिव्यर्केषुवेदन ७ ब्रह्माणंविदधाद्ग्रेतस्मैवेदानुपाविशत्
विश्वतश्चक्षुरीशानोविश्वतोबाहुरीश्वरः ८ विश्वतःपाणिपादोयंसहस्राक्षःसहस्रपात् अत्यतिष्ठद्दिदंसर्वंईशानोयंदशांगुलं ९ यद्भूतंयच्चवै

भव्यं वर्तमानं महेश्वरः एतावानस्य महिमानातो ज्यायांश्च पूरुषः भीषैव पवते वायुः भीषैवोदेति भानुमान् भीषैव अग्निरिंद्राद्या मृत्युर्धावति भीतितः २१ अपाणिपादो जवनो गृहीता चक्षुरीश्वरः सवेत्ति वेद्यजातं च न तं वेत्ती ह कश्चन २२ तमाहुरेकं पुरुषं ज्योतिषां ज्योतिरीश्वरं हिरण्यबाहुमीशानं सर्वांगेन हिरण्मयं २३ एषोंतरादित्यगतो नीलग्रीवो विलोहितः बभ्रुश्चायं महादेव उग्रोयं च सुमंगलः २४ यो वै रुद्रः स भगवान् गीतश्चाथर्वणोत्तमैः अन्नानां च पतिः शंभुः क्षेत्राधिपतिरीश्वरः २५ मित्राधिपो महादेवो तथा धनपतिः शिवः भूमानंदघनो ह्यात्मा साम्ना गीतो महेश्वरः २६ एष ब्रह्मैष एवेंद्रो ऋग्भिर्गीतो हरोव्ययः नमस्ते रुद्र इत्यादिवाक्यैश्च यजुषोद्भवैः २७ इतिहासपुराणेषु ईशो गीतः पुरातनैः महोपनिषदां सारे रयमेव हि गीयते २८ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः हंत मोनाशनं तस्य ज्ञानादेव हि जायते २९ न प्राणो न मनश्चायं असंगः संगिवत्स्थितः सदैव संतमप्येनं न देवा न महर्षयः न विदुर्ब्रह्मविष्ण्वाद्याः सेंद्ररुद्रार्कवायवः यतः प्रसूयते विश्वं ब्रह्मविष्ण्वीशपूर्वकं २१ सध्येयः परमेशानो आकाशदहरे हरः सर्वभीता प्रमुह्यंति द्यावाभूम्योर्य आंतरः २२ अनंतो ह्यव्ययात्मायं पुरुषः प्रकृतेः परः यमज्ञात्वा महादेवं मोहिताः ससुरासुराः २३ आत्मानं मन्यते सर्वे देहाहंकारसंहृताः मायया देवदेवस्य चित्रलीलस्य वर्तिनः २४ जितमायः स एवेशः स कारणमुमापतिः स नित्यो नित्यभूतानां चेतनानां सचेतनः २५ स कारणं कारणानां पत्नीनां पतिरीश्वरः जगतः कालरूपस्य कालकालो महेश्वरः २६ महाग्रासोयमीशानो यस्योदनमहर्निशं ब्रह्मक्षत्रात्मकं विश्वं मृत्युर्यस्योपसेचनं १७ यदा चर्मवदाकाशं वेष्टयिष्यंति मानुषाः तदा शिवमविज्ञाय दुःखस्यांतो भविष्यति २८ यदा तमस्तन्न दिवा न रात्रिर्न सन्नासच्छिव स्वयं स चाक्षरो नित्यमलुप्तशक्तिः धाता विधाता परमोथ संहृत् २९ प्रपंचपंचीकरणे निरतो यः शिवं विना तेवं चिंता महेशेन सर्वे चैव सुरासुराः ३० परिवंचक ईशानो देवदेवस्त्रिशूलभृत् य एनं विदुरीशानममृतास्ते भवंति वै ३१ अथेतरे दुःखयुक्ताः संसारवशवर्तिनः जरामरणसंयुक्ताः षडूर्मिपरिमोहिताः ३२ देहात्मवादिनः सर्वे ईषणाभिर्विमोहिताः तापत्रितयमध्यस्था स्वस्थाभ्रांतिसमाकुलाः ३३ जायंते च म्रीयंते च कीया इव सुरा नराः वानरा इव सर्वेपि पामरा दुःभागिनः ३४ यस्य रूपं मुने सर्वं जगदेतच्चराचरं भूमिरापोनलो वायुराकाशं व्योमकेशभाक् ३५

कोहितद्वेदेवस्यमहिमानंपिनाकिनः यजंतियागैर्नियतायजमानामहेश्वरं ३६ भिक्षवःकस्यवःसंतिवेदांतैश्चविजानते योगिनोयुंजतेयोगं
यद्दित्तार्थिनोमेवहि ३७ नानावर्णाश्रमेधर्मैरिष्टापूर्तैरुपासते मंत्रैर्मंत्रविदःसांबमुपासंतेमहेश्वरं ३८ लेभिरेस्वपदान्येवयस्यलिंगार्चनेननहि
ब्रह्मविष्ण्वादयोरुद्रामुनयोमनवःसुराः ३९ असुरानृपवर्याश्चगंधर्वाप्सरसोरगाः विपद्भिर्मोचिताएवसंपद्भिश्चनियोजिताः ४० सर्वविश्वाधि
कस्यैवनिश्वासाज्जायतेजगत् जातंचवर्धतेनित्यंस्थीयतेलीयतेस्तिच ४१ यस्याष्टमूर्तिभिर्व्याप्तंजगतत्रिशूलिनः अग्निःशिवउमासोमोआ
भ्यांव्याप्तंजगत्रयं अग्निषोमात्मकंविश्वंजानंतिपरमर्षयः नदेवांकयुक्तंचैवभगलिंगांकितंसदा ४५ पुंप्रकृत्योरिदंरूपंतस्माच्छिवमयंजगत्
अनंगमातंगहरोहराणांहृदयेस्थितः ४४ सपरःपुरुषःप्राणःपरमात्माशिवःस्वयं अद्वैतोयंचतुर्थोयंपंचकोशातिगोह्ययं ४५ यस्माद्ब्रह्मान
यारुद्रोविष्णुर्विश्वंप्रजायते सर्वमन्यत्परित्यज्यध्येयःसांबस्त्रिलोचनः ४६ उमासहायोभगवान्मायामायीसईश्वरः संगतापत्तिरीशानोभ
क्तानांमंगलप्रदः ४७ अमंगलंहरत्येवभक्ताभक्तैरुपासितः सर्वेश्वरोमहादेवःसर्वैश्वर्यसमन्वितः ४८ जितमायोमहादेवस्तस्यमायाजिताः
सुराः क्षेत्राणांचपतिर्देवःपशुपाशविनाशकः ४९ मायापाशैर्निबध्नातिजगत्सासुरमानुषं मोचयेदंबिकानाथःपाशेभ्यःससुरासुरं ५० भ
क्त्याप्रसादितोदेवःसाक्षात्पशुपतिःशिवः यस्यनिश्वासपवनावेदामानंमुनीश्वराः ५१ यःसोमभागेरीज्यतेसोमःसोमार्धशेखरः पार्वतीनायको
नेतास्थावरस्यचरस्यच यस्यांशलेशोहिजगद्भूतंभाविभवत्तथा सर्वंशिवमयंविश्वंनाशिवंविद्यतेमुने ५३ सर्वंशिवात्मकतयाप्रतिभातिवि
श्वंविश्वाधिकस्यकृपयाखलुसर्वमेतत् ५४ जानीहिशंभुकृपयापरिवर्ततेदंभूम्यब्धिकाननसुरासुरमानवंच नान्यद्भूतभवंजगत्सुरनरंस्था
तेजवाय्वादिखंज्योतिर्जालजलंजडाजडजगद्द्यावापृथिव्योंतरा ईशावास्यमिदंतदेवविहितंआप्तंमयंव्यापकंचैकानेकपरंपराप्रमुदितं
जानीष्वसर्वंशिवं ५६ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेचतुर्थोध्यायः॥४॥ जैगीषव्यउवाच धन्योस्म्यहंतारकारेश्रुतंसर्वात्मपमी
शितुः तत्वौपनिषदंसोमंपृच्छामिपुरस्त्वंपुनः १ कथमीशस्यचरितंविस्मयावहमुत्तमं १ सर्वेनरासुराःसर्वेमुनयश्चतपोधनाः २ चित्रलो

शिवरहस्य अ० लसदेवस्यविश्वेशस्यकृपावशात् तरंतिदुस्तरंस्कंदसुघोरंभवसागरं ३ यत्कृपालेशसंभूतंजगदेतच्चराचरं महाकारुणिकःशंभुःससर्वे
अ० ५ षांप्रसादकृत् ४ कथंदेवस्यचरितंवदमह्यंकृपावशात् नूनंमेविस्मयप्राप्तिहेतुदंभक्तिवर्धनं ५ उमापतिपदांभोजभक्तिदंमुक्तिदंमम वदत्वंता
रकारेणैककथांकथयमांप्रभो ६ सहैभिर्मुनिभिश्चैवगणेंद्रैःसुरसत्तमैः श्रोतुमुत्कंठितंचेतन्नतन्मह्यंकृपयावद ७ सूतउवाच इत्युक्तंतद्वचःश्रु
५ त्वामुनिंस्कंदोऽभ्युवाचहि महेश्वरस्यचरितंशृण्वतामघनाशनं ८ सतुषड्वदनांभोजसंभवैर्लोचनोत्पलैः कृपावलोकनेनैववीक्ष्यशांभवपुंगवं ९
गणेंद्रानमरेंद्रांश्चप्रशस्याहप्रसन्नवाक् स्कंदउवाच भवन्तुनैवगोप्यंमेशांभवेषुमहात्मसु शांगांगसंगोऽभंगायदुःखानामेवकेवलं ११।५१
भवतीशप्रसादेनभवनाशोमहामुने शंभोःकथाकर्णनेनकर्णौधन्यतरौतव १२ ममवक्त्राणिधन्यानिलोचनावलिरेवमे शिवलिंगालोकने
नकैलाशेशंकरालये १३ तूर्णमभ्यर्णगामुक्तिरपर्णापतिपूजया पापारण्यमहादावःशंकरस्यैवपूजनं नविनाशंकरस्यार्चासंसारोत्तारणंभवेत्
भस्मांगरागोयोभूयाद्भावोभवपदार्चकः १५ भवाभावंभजत्येवभावएवहिभाग्यवान् शंगलिंगार्चनेनैवपापभंगःप्रजायते १६ अनंगमातंग
हरपदार्चकजनप्रियः भवत्येवविशेषेणशांभवोभूरिभाग्यवान् १७ महादेवस्मृतिःसद्योविद्योतयतितंनरं सुरंवाकिन्नरंवापिउरगंयक्षमेवच १८
गंधर्वंगरुडंवापिकीटंपतंगमेववा करोतिशंकरःकृपामोक्षायैवनसंशयः नकिंददातिसाम्राज्यंप्राज्यंभक्तेषुकेवलं यदुदारकथासारसारसा
नांमहात्मनां भवंतिसंपदोनित्यंसर्वेषुसुखहेतवे भावैकसुलभोदेवोभक्तवश्योभयापहः २१ भावग्राह्योह्यनीडाख्यइत्याहाथर्वणीश्रुतिः तो
नैवसर्वमुक्त्यर्थंसृष्टंशंकरपूजनं २२ नास्त्यन्यत्तारणंनृणांविनाविश्वेशपूजनं कःसंतरेतभवदाममसारसारवासनां २३ तांमृत्युंजयपूजा
र्थमुपयुज्यसुखीभवेत् नविनाम्यत्रधर्मेज्याकरणेनाश्नुतेपदं २४ श्रीमृत्युंजयपूजैवसुलभामोक्षदायिनी नपूजापूजकोवास्यस्वतंत्रेसे
श्वरस्यहि २५ किंतुसर्वाभयार्थंहिसृष्टैवलिंगपूजनं लिंगेर्चितोमहादेवोददातिविपुलांश्रियं २६ विमुक्तिजनकंज्ञानंददात्येवमहेश्वरः
यःसकृद्बिल्वपत्रेणद्वित्रैर्वाभावपूजितः भवोभवहरोभूयाद्भावानांनात्रसंशयः यस्यसंपूजनाद्देवब्रह्मविष्ण्वादयःसुराः २८ सेंद्राःसवरुणा

रामः
५

देवानिवसंतितिविष्टपे असुरायक्षरक्षांसिमुनयोमनवस्तथा २९ प्रियंलिंगार्चनंशंभोःनान्यत्किंचिन्मुनीश्वर नदानेनैवतपसानवर्णाश्रम
धर्मतः ३० एतद्धिसार्थकंश्रोतंश्रीमहादेवपूजनं विश्वेशपूजयाविश्वंसर्वंसंपूजितंभवेत् विश्वाधिकोमहादेवःसर्ववेदांतसंस्तुतः स्मृतःसं
पूजितोनित्यंध्यातोवामुक्तिदायकः ३२ दर्शनंस्पर्शनंलिंगे अयंमेइतिमंत्रतः सर्वपापक्षयायैवमुक्तयेभवतेनृणां ३३ योमहेशंसदातस्यात्वास्व
हृदंभोजमध्यमे उमासहायंत्र्यक्षंचनीलकंठंसधन्यभाक् ३४ मान्यःसुराणांसर्वेषांमुनीनामपिवैमुने मन्येमहामनुस्समोनदेवःकरुणाकरः ३५
अपराधिषुभक्तेषुसहमानःसएवहि चुलुकंजलमात्रंवात्रुटितंविल्वजंदलं ३६ ददातिनियमाद्योवैतस्मैमुक्तिंप्रयच्छति ब्रह्मादिदुर्लभंज्ञानंदत्तेदे
वमहेश्वरः विश्वनाथोह्यनाथंतंसनाथंकुरुतेनरं स्वभक्तंमन्मथारातिरनाथजनवत्सलः ३८ तस्यैवभक्त्यासुलभोमोक्षोनोधर्मकोटिभिः तस्ये
शस्यप्रसादार्थंसृष्टाहिविविधाक्रियाः ३९ जपहोमार्चनाध्यानव्रतंकृच्छ्राणिसत्तम योगसांख्यंचतंत्राणिस्मृतयोनिगमाअपि ४० आगमाश्चापिवि
विधाःयत्रतत्रपुराणिच श्रुतयःस्मृतयःसर्वावर्णाश्रमनिबंधनाः ४१ बंधनायैवसर्वेषांनमुक्तेःकारणंभवेत् प्रसादकरणान्येवनप्रसादोभवेत्स्थितैः ४२
प्रसादकारणंशंभोभक्तिर्यानिश्चलाशिवे भक्त्यैवभवपाशेभ्योमोचनंजायतेनृणां ४३ भक्त्यातरतिदुर्गाणिभक्त्याभद्राणिपश्यति भक्तिरेवविरू
पाक्षेसदाकार्यामुनीश्वर ४४ भस्माभ्यक्ततनुर्भावोभवलिंगंसमर्चय कालभीत्यापिमुच्येतसंसारोरुरगतसर्पतः ४५ रुद्राक्षमालाभरणोरुद्रस्र
क्तजपादरः पंचाक्षरजपोनित्यंसर्वदाशिवपूजकः ४६ सएवमुक्तिकांतायाःपतिरीशेनकल्पितः रुद्रक्षेत्रादिनिरतोविरतोभवसागरात् ४७ जा
गरूकःसदानंद्रोभवतीश्वरचिंतकः जरामृत्युजगज्जन्मसुखदुःखाकुलंजगत् ४८ पश्यन्माप्रमदोभूयाद्विश्वेशपदपूजने आयुर्यात्येवनियत
मामकुंभेययापयः ४९ संपदोविपदस्ताहिसर्गेधर्मेतुनश्वराः शोकमोहसमाक्रांताःससुरासुरमानवाः ५० धनंक्षयांतंसर्वेषांप्रियाणांविप्रयोगिता
परीक्ष्यसर्वंदुःखांतंविरज्येतेतिहिश्रुतिः ५१ नायुरायासनीयंहिधर्मार्थाद्यनुचिंतनैः स्वस्थोहृत्स्थंशिवंध्यायेत्तेनदुःखैर्विमुच्यते ५२ सूतउवाच कः
संतरेतभवमेतदसारसारंमूढात्मनामृगदृशापरिचिंतितंयत् दुःखायतद्भुमवतांपरिधावितंयत्तत्ख्याहरंभवतिकिंमहतांयथापः ५३ तद्द्भ्रमेणशि

वपादयुगंविहायपद्मासनाञ्जनयनान्परिशीलयंति पातांतधर्मनिचयान्मरणोत्तरेपिकालत्रयप्रत्तोभवतिचोदितएषधर्मः ५४ श्रीस्कंदउवाच॥
प्रकाश्योनैवार्यविधिरपिकदाचिद्द्विजपशोप्रदेयोयंशांतेषुसमभवभक्तेषुनियतंशिवस्पष्टैतावद्गदितमिदमेवाद्यमधुरंश्रुणुत्वंभक्तैवश्रुतिगतमि

दंज्ञानमधुना ५५ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेस्कंदजैगीषव्यसंवादोनामपंचमोध्यायः॥५॥ श्रीस्कंदउवाच वक्ष्याम्यद्यमुनिश्रेष्ठनागा

नांतपसःक्रियां अपर्णापतिपादाब्जध्यानासक्तासुपर्णजं १ भयंत्यक्त्वाविजहुस्तेआकल्पाद्ब्रह्मवन्हिके इममर्थंपुरादेवीकैलासेप्राहशंकरं २
विस्मितातीवसावीक्ष्यभीतापन्नगसत्तमान् श्रीदेव्युवाच नागैरेतैर्महादेवदेवदेवजगत्पते तवांगसंगजनकंपुण्यंचकिमुपार्जितं ३ किमेभिःशंग
लिंगार्चाभुजंगैःकिंकृताशिव तन्मेवदविशेषेणकरुणाकरशंकर ४ इत्थंगौर्याहरःपृष्टोतदुदंतमुवाचह श्रीमहादेवउवाच शृणुदेविप्रवक्ष्यामि
नागानांपूजनंमपि आकल्पाद्ब्रह्मवन्हेद्यत्तसर्पाभागपगौरवैः ५ ममप्रियतराःसर्वेकंदर्पारातिपूजया कद्रुःसुपर्णीचपुराविवदेतेशिवेकिलअम्ब
बालातनःकृष्णाश्वकारात्कुटिलेनहि आशीविषविषेणैवपणितासान्ययासह ७ क्रीडायुक्तासपत्नीसासुपर्णीदास्यभावतः सादुःखितासुतंप्रा
हस्वस्यदास्यविमोक्षणे ८ अमृताहरणार्थायगरुत्मंतंतदामुने सुपर्णोउवाच कद्रूकौटिल्यतःपुत्रतत्पुत्रैश्चविलूनैः पणितेनमयापूर्वंदे
वगंधर्वबालके ९ निस्पश्चेतेनेतिमयाकृष्णोत्युक्तेतयापुनः दास्यंतदावयोर्वाक्यात्सत्यभूताभवत्विति १० इच्छापुत्रैःकृतंतस्याबालानाम
सितक्रियांदास्यभावंसमापन्नासपत्न्याःपुत्रनाशय ११ अमृताहरणेनैवत्वयात्तीर्णाण्डजेश्वर एतदर्थंहिपितरौपुत्रंकांक्षयतःसुत १२ पुन्ना
म्नोनरकान्त्रातापुत्रएवनसंशयः यदामृतंतेदास्यामितदादास्यंनचैवमे १३ इतिप्रोक्तंमयातस्यैतत्पुत्रपरिपालय योदुःखान्त्रायतेपुत्रपि
तरौसमसुतोत्तमः १४ अस्माद्दुःखांबुसंरोधात्समुत्तारयमांद्रुतं सूतउवाच इतिमातुर्वचःश्रुत्वागरुडःपततांवरः प्राहप्रणम्यतांदेवीमेवम
स्त्वितिदर्पितः १५ गतःसकाश्यपिस्तस्मान्मेरोःशिखरमुत्तमं नानाद्रुमलतोपेतंफलपुष्पावनामितं १६ मृगाण्डजवरैर्युक्तंसगत्वापितुराश्रमं
तंपश्यंतंतपोराशिंपितरंकाश्यपंतदा १७ भस्मरुद्राक्षसंपन्नंशिवाराधनतत्परं शांभवैर्मुनिभिर्युक्तंरुद्रसूक्तजपादरं १८ प्रणम्यविनयेनैवस्थि

तस्तस्यैवसन्निधौ तेनानुमोदितस्तत्रनिषसादांडजेश्वरः तं दृष्ट्वा स्वसुतं विप्रो गरुडं खिन्नमानसं उवाचविनयोदारं कश्यपोब्जजसंभवः २०
कश्यपउवाच कुतः समागतं वत्स क्ववासंप्रतिगच्छसि किंचिकीर्षुरिहप्राप्तः परिक्लिष्टोभिदृश्यसे सपितुर्वचनंश्रुत्वाप्रांजलिःप्राहतंमुनिं
गरुडउवाच भगवन्तपतांश्रेष्ठसाक्षाद्ब्जजसंभव मात्रोर्विवदतोरेवंदास्यभावेनखेदितः २२ मातुर्दास्यविमोक्षायत्वत्सकाशमिहागतः
भवान्पिताशंभवश्चमहात्माशिवभावनः २३ अमृताहरणेयत्नंकर्त्तुमिच्छामिसांप्रतं मातुरानृण्यमिच्छामिकृत्वादास्यविमोचनं केनप्रा
प्तिर्भवेन्महांस्तदुदाहरमांप्रति तदद्यभगवानेवब्रवीतुकृपयामयि २५ कयायांशरणंलोकेविहायैकंप्रजापतिं इत्यंडजवचःश्रुत्वाकाश्यपो
ध्यानचक्षुषा समीक्ष्यपत्न्योःकौटिल्यंकनीयस्यामुनीश्वरः उवाचपतगश्रेष्ठंशिपिविष्टपदाश्रयः २७ कश्यपउवाच सापत्न्यनामलोके
षुपुत्रकौटिल्यदंसदा सापत्न्यास्मिमहद्दुःखंदेवैर्दैत्यैःपुरासुत २८ सगरोंगारसदृशःप्राप्तःस्वर्गच्छयांडज ध्रुवोदाशरथिश्चैवपांडवादुःख
भूमयः २९ सापत्न्यैरेवकौटिल्यात्स्त्रियाभ्रंशिताःपदात् नलोपिपुष्करेणैवविजितान्नृपनंदनः पुनरभ्यर्च्यदेवेशंस्वाराज्यंलेभिरेनृपाःवाह्या
श्चशत्रवस्त्वन्येसापत्न्याह्यांतरास्मृताः ३१ काद्रवेयैःकृतंकर्ममातुस्तेदास्यकारणं अमृताहरणार्थायसुराणांविजयायच ३२ उपायंतेप्र
वक्ष्यामिविजयायरणेद्विज अनर्चितमहेशानांजयोनैवभविष्यति ३३ समभ्यर्च्यमहादेवंसुराश्चजितशत्रवः तस्मादाराधयेशानंजेतारमप
राजितं ३४ क्षयद्वीरंमहादेवंशंकरंशरणंव्रज यदिदेवःशरण्यश्चजयस्तस्यनदुर्लभः ३५ पुराविष्णुश्चदैत्येयपीडितामरचोदितः जगामशरणं
सांबंदेवदेवंकपर्दिनं ३६ सहस्रंशरदांवत्सभस्मरुद्राक्षभृत्स्वयं पंचाक्षरजपासक्तःपंचास्यध्यानपूर्वकं ३७ समभ्यर्च्याब्जवरैर्नेत्रेणा
भ्यर्च्यशूलिनं शिपिविष्टात्स्वयंतुष्टाच्चक्रंलेभेसुदर्शनं ३८ तेनाजौनिहतादैत्याःकोटिशोवलवत्तराः हिरण्याक्षश्चकशिपुःकालकंजापु
लस्त्यजाः ३९ मधुकैटभसंज्ञाश्चमुरकंसादयःपुरा कर्मदेवेषुसश्रेष्ठमवापज्येष्ठपूजया ४० ब्रह्मणापिमहादेवःपूजितोभक्तिभावतः
अलभत्सृष्टिसामर्थ्यंवेदजालंमहेश्वरात् ४१ इंद्रोपिवज्रंलेभेवैश्रीमहादेवपूजया वृत्रासुरसमुद्भूतांब्रह्मवध्यामवापह ४२ दध्योसंपू

शिवरहस्यअष्ट० जयन्तं सावंतस्मात्पापाद्विमोचितः गुरोर्भार्यापहरणात्स्वभार्याणां विवर्जनात् ४३ रोहिण्यामतिकामेन जायेन्यसमपद्यत चंद्रोयस्माद्विनिर्मुक्तोस्

अ०६ यैः कुष्टाद्विमोचितः दक्षो विनिंदनाल्लंभोलिंगार्च्चातो विमोचितः दधीचिर्मंकणो गार्ग्यो कण्वो मेधातिथिर्मुनिः ४५ गोतमः कवषो धौम्योउपमन्यु

७ र्महामतिः क्षीरवारिधिमासाद्यमोदत्तेशंकरार्चकः ४६ मार्कंडेयो विजिग्येथयमं सर्वभयप्रदं विश्वनाथार्चनेनैव सोब्धिपः कलशोद्भवः ४७

दुर्वाससस्तपोवृत्तिरीशानुग्रहतो द्विज तथैवान्येनृपतयः सोमसूर्यान्वयोद्भवाः ४८ समभ्यर्च्य महादेवं लेभिरे वांछितानि हि भुक्ति मुक्ति प्रदं पुंसां

विजयारोग्यप्रदं सदा ४९ कालमृत्युप्रहरणं महादेवस्य पूजनं नविनाशंकरस्यार्चा भुक्तिमुक्ती हि सिध्यतः स्वर्ग्यं पुत्र्यं पशव्यं च श्रीमहादेवपूजनं

भक्त्या बिल्वैः समभ्यर्च्य भस्मरुद्राक्षभूषणः महापापैर्विमुच्येत किं पुनश्चोपपातकैः भृगुरुज्जीवयामास स्वभार्यां निहतां पुरा ५२ विष्णुश्छि

न्नतया पूर्वं सुरकार्यार्थसिद्धये शशाप विष्णुं विप्रोसौ सदा भर्गपदाश्रयः ५३ मुनयो गणपाश्चैव अन्ये चैव सुरासुराः लेभिरे वांछितान्येवत्त

स्मात्त्वमपि पूजय ५४ शिवस्य लिंगं दयितं बिल्वैर्भस्माक्षभूषणः सूत उवाच विष्णुः स्त्रीवधनिर्घृणो जनिजरानाशप्रदं शापमप्यागाद्दैत्यवैरैः

सुराजिविजितैः संप्रार्थितो सौभृगुः तेषु स्थानवरं ददे शक्रपयातद्विष्णुरालोक्य वैचक्रोत्कृत्य तदीयशापभयतो नन्वीक्य परावर्तत तामुज्जी

व्यभृगुः शशाप हरिमप्याजौ हि भर्गार्चको योनि घ्नप्पति कुत्सितत्तासु नितरां देवैस्तदा दुद्भवे दैत्यानाहगतव्यथांश्च निरुजां प्राप पद्यथायो द्रुतंपा

तालेनिवसंतु भोगिनिलये शंभोः पदाब्जार्चकाः ५६ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे षष्ठोध्यायः ६ ॥ काश्यप उवाच अमृतंर

क्षितं देवैः नाकसद्मनि सर्वदा उदायुधधरा देवाः तद्रक्षंत्यनिशं द्विज १ निद्रातंद्रादिरहिताः शक्रस्याज्ञावशे नहि तज्जयोपायमेतत्तेक

थयामि अंडजेश्वर २ त्रिपुरा वंचितास्तेन विष्णुना वंचितो बली मोहयामास तंत्रेण कुशास्त्रेणासुरांस्तदा पाषंडान्ताः स्वयं चक्रे शिवभक्तान्

जितेंद्रियान् शिवार्चनपरिभ्रष्टान् भस्मरुद्राक्षवर्जितान् ४ पंचाक्षरोज्झितांश्चक्रे रुद्राध्यायविवर्जितान् कृत्वैव योधयामास तेनजिग्ये

रामः

हरिः पुरा ५ स्वयं गर्वेण तत्याज शिवचिन्हानि शूलिनं वीरभद्रेण निहतो दक्षयज्ञे पुरा हरिः ६ तृतीयांशे समकथितो विस्तारश्चांडजेश्वर तेनपा

पेनसहरिःनिहतःशूलपाणिना ७ मत्स्यकूर्मवराहादिनारसिंहतनुष्वपि यःशांभवाचारहीनान्याखंडान्कुरुतेनरान् ८ कुतर्कवाक्यैर्योमर्त्यो
विप्रोवानरकंव्रजेत् अधोमुखोर्ध्वपादोसौलंकोहर्निशंमलेः ९ यःशांकरांश्च्रावयेत्भक्तिभावान्महेशितुः सयात्येवाशुनरकंसचायंयापकृ
त्तमः १० सर्वेषांनिष्कृतिःप्रोक्तापापानांनरकापहा शिवद्रोहःशांभवानांद्रोहोवानरकावहः ११ नरकोत्तारणंनृणांनैवजातुभविष्यति शिवद्रोहेषु
सर्वेषुशरण्यःशिवएवहि १२ समोचकोमहादेवःशिवद्रोहेषुसत्तम सहमानतयासर्वभक्तानांपापनाशकः १३ नान्येषांनिष्कृतिःप्रोक्ताशिवद्रो
हेषुसत्तम तस्मात्तंशरणंयाहिसर्वासिद्धिंप्रयच्छति १४ विद्याहृद्यावराम्येवतवपंचाक्षरात्मिका पंचाक्षरपरोमर्त्यःशिवज्ञानायकल्पते तेनमु
क्तोभवत्येवविद्ययाद्योततेंडज पितैवोपदिशेन्मंत्रंगायत्र्याःसममेवहि १६ गायंतंत्रायतेयस्माद्गायत्रीभर्गचिन्हिता संसारभंजकोभर्गःशिवएवे
तिनिश्चितः १७ पंचाक्षरंचगायत्रीश्रौतमंत्रद्वयंस्मृतं उभयोर्दैवतंयस्मान्महादेवोमहेश्वरः विप्रैरेवसदामंत्रोजपनीयःप्रयत्नतः स्त्रीशूद्राणां
नमोंतेनजप्यःपंचाक्षरःपरः १९ अभावेतुपितुःपुत्रतत्पितापुत्रएवहि अन्येवाज्ञातयोविप्राःशांभवावान्यतःसुत २० यथैवोपनयेशास्त्रंतथापं
चाक्षरेपिच गायत्रीवत्सदाजप्योमंत्रराजायमुत्तमः २१ तस्मात्तवोपदेक्ष्यामिमंत्रंपंचाक्षरंपरं मंत्रेणानेनदेवेशंयःपूजयतिशंकरं २२ सर्वपापविमु
क्तश्चजायतेनात्रसंशयः पंचाक्षरंसतारंयोप्रजपेत्प्रीतिपूर्वकं २३ सतुमुक्तोभवत्येवषडक्षरसमाश्रयात् पंचास्यध्याननिरतोपंचाक्षरजपादरः
महापापयुतोवापियुक्तोवाप्युपपातकैः विमुच्यतेसद्यएवराहुमुक्तइवोडुराट् नगायत्र्याःपरोमंत्रोनतुपंचाक्षरान्मनुः द्विजत्वेसाचैवेप्रोक्ता
गायत्रीभर्गदेवता २६ शिवप्रसादसिध्यर्थंश्रीमत्पंचाक्षरोमनुः द्विजानामभयंमंत्रंसर्वेषामनकाम्यकं २७ तांत्रिकोवैदिकाश्चैवभागतोवाय
थारुचि द्विजाराध्योमहादेवःमनुर्जाप्योद्विजस्मृतः २८ तस्माद्विजानांमंत्रौद्वौप्रसादद्विजकृद्दो यस्पदेशशांभवेप्रोक्तासर्ववर्णामरास्त्रियः २९
शिवप्रसादसिध्यर्थंजपनीयोमनुःपरः स्त्रीभिःशूद्रैर्नमोंतेनजपनीयोमहामनुः गायत्रीतिद्विजातीनामेवंत्रैवर्णिकेष्वपि नान्येषांशूद्रजातीना
मंगनानांजपेस्मृता शूद्रोजप्यातुगायत्रींनरकेपच्यतेचिरं जातिप्रसादजनकौमंत्रौद्वौशांभवौस्मृतौ ३२ वेदमाताचगायत्रीवेदमध्यगतास्वयं

तस्मान्मंत्रद्वयं विप्र सर्वथा श्रुतिमध्यगं ३३ प्रलये समनुप्राप्ते वेदा लीयंति यत्र वै गायत्र्यामेव गायत्री भर्गशब्दे शिवात्मके ३४ शिवपंचाक्षराकाराः
पंचवर्णाः शिवात्मके वर्णाः पंचाक्षरस्यास्य पंचास्यक्रमतः शिवे ३५ लीयंते किल कल्पांते प्रणवो हृदये स्थितः तस्माच्छ्रुतिषु सर्वत्र शिवो गीतः सदा
शिवो ३६ ईशानः सर्वविद्यानामीश्वरः सर्वभूतकृत् ब्रह्मैव सर्वदा शंभुः ब्रह्मणोऽधिपतिः शिवः नकारेऽपि च लीयेत सद्योजातात्मके शिवे मकारे
ऽपि च लीयेत वामदेवात्मके शिवे शिकारेऽपि च लीयेत अघोरात्मे महेश्वरे वकारेऽपि च लीयेत शिवे तत्पुरुषात्मके ३९ यकारेऽपि च लीयेत सर्वांगेऽपि चशं
करे एवमेव महामंत्रे अविमुक्ते विशेषतः ४० स तारस्तारको मंत्रः शैवेभ्य उपदिश्यते सन्न्जीवेभ्य एवेशः ईशानेनैव दयालुना ४१ नातः परतरो मंत्र
स्तारकः पारमेश्वरः यस्मादुच्चार्यमाणेऽपि शिवरूपं विभासते ४२ शिवस्वरूपभासेन स तु साक्षाच्छिवो भवेत् वर्णेभ्योऽपि परं सारं तारं शिवमयं विदुः
४३ अविद्याकर्मपाशेभ्यस्तारणात्तारमेव हि वर्णाः त्वन्ये तु सगुणा निर्गुणं तारमेव हि ४४ स तारं वर्णसहितं शिवरूपावभासकं शिवस्य निर्गुणं सा
क्षात्तारमेव हि केवलं ४५ एकाक्षरं यत्प्रणवं तत्तारं समुदाहृतं तदेवांगी थवाक्येन सर्वश्रुतिषु गीयते ४६ तदेवानंदकंदोऽस्य सर्वशब्दावभासकं॥
संशीलयन् परं याति शिवमेव हि निर्गुणं ४७ गायत्री मंत्रसारं हि द्विजकुलतिलकाकार सिस्थ त्वदायो मंत्रोऽयं शिवतोषकृत्सु विहितो वेदांतभागेष्व
पि तारोऽयं परनिर्गुणप्रकरणे शब्दादिरेवैष वै भिक्षूणामथ शांभवात्मकहृदा संशीलितो मुक्तिदः ४८ इतिश्रीशिवरहस्ये भीमाख्ये अष्टमांशे स
प्तमोऽध्यायः ७ ॥ पतंगउवाच प्रदेहि परमं मंत्रं संसारोत्तारकं गुरो येन मुक्तो भवाम्यद्य संसारादघसागरात् १ सिद्धिं च साधये काम्यां प्रसादा
त्परमेष्ठिनः मातुरानृण्यमिच्छामि प्रसादाद्देव शूलिनः त्वत्तो मंत्रमिमं लब्ध्वा संपूज्य परमेश्वरं पितः प्रसादं कुरु मे शांभवस्त्वं महामुने ३ शांभ
वी पदवी विद्येयं लब्ध्वा शंभोः प्रसादकृत् यः पुत्रः पितरं त्यक्त्वा शांभवं ज्ञानपारगं ४ पंचाक्षरं चान्यमुखाल्लब्ध्वा संपूजयेच्छिवं स नैवाधिकृतो भू
यात्प्रसादात्परमेष्ठिनः ५ तत्त्वविद्भिश्च कथितं शिवोऽप्याहैवमेव हि अशांभवो यदि पिता पुत्रश्चेच्छांभवो भवेत् ६ शांभवाद्देवतन्मंत्रं गृण्ही
याद्वैदिकोत्तमात् नाविद्वत्पितृतो मंत्रमित्याह परमेश्वरः ७ तस्माच्छिवोदितो मार्गः हे रैवायपुत्र मुने दद्दो शिवो शिवायै सः स्कंदाय प्रददौ शिवः

गणानांप्रददौमंत्रंपंचाक्षरमनुत्तमं भर्तुःसकाशाद्भार्यापिलब्ध्वामंत्रंशिवंजपेत् ९ नमोंतेनैवशूद्रोपियत्रस्त्रीसमउच्यते शूद्राणांनैवमंत्रेषु
अधिकारोमुनेकिल १० पंचाक्षरेनवैशूद्रानधिकृत्यवदेत्गुरुः तन्मेवदविशेषेणसंशयोस्मिन्हिकश्यप ११ सूतउवाच ततःपतगराजस्य
श्रुत्वावचनमीदृशं पद्मजातसुतःप्राहतद्बोधकरंवचः कश्यपउवाच सत्यमुक्तंत्वयापुत्रगुह्याद्गुह्यतरंवचः तदद्यसंप्रवक्ष्यामियथाशि
वमनोरथं १२ विरक्तानांतुशूद्राणांशांभवाचारवर्त्मनां गुरुत्वेनद्विजःश्रेष्ठःपरिग्राह्योनशूद्रजः १४ विप्रोपिशांभवोयुक्तःशूद्रंभस्माक्षधारिणं
परीक्ष्यनियतंधर्म्ममग्राम्यंसंकरंनच १५ शिवालयंततोगत्वाशिवतीर्थेनिषेव्यच सन्निधौदक्षिणामूर्तेःभूर्जपत्रेलिखेन्मनुं १६ त्रिवारंवाचयेद्विप्रः
शूद्राद्विधवयापिचनमोंतंविधवाशूद्रोतथान्येद्विजवत्स्मृताः १७ नस्वयंतद्वदेत्कर्णेशूद्रस्यद्विजसत्तमः सचशिष्योभवेच्छूद्रःगुरुर्विप्रोनसंशयः१८
एवमाहुःपुराचार्याःशिवाभिमतमुत्तमं स्त्रियोपिभर्तृमुखतःप्राप्यमंत्रमिमंजपेत् १९ अन्येवर्णास्त्रयोप्येवंपितुःप्राप्यमहामनुं जपेयुःपूज
येयुश्चमंत्रेणानेनशंकरं २० विल्वपत्रैःप्रसूनैर्वात्रिवारंसकृदेववामृल्लिंगेरसलिंगेवाधातुजेनार्मदेपिवा रत्नलिंगेषुवासम्यक्स्थावरे
वाचरेपिवा स्वयंभवेवादैवेवाआर्षेवामानवेःकृते २२ उत्तरोत्तरतोत्कर्षात्पूजनीयःसदाशिवः लिंगेष्वेतेषुभक्त्यैवनियमाच्छंकरार्चकः २३
स्फाटिकेपूजितःशंभुःप्रददातिचवांछितं लिंगार्चनेनसकलंवांछितंप्राप्यतेनृणां सर्वेलिंगार्चनेनैवप्राप्यंतेहिमनोरथाः शिवस्यलिंगपूजैव
मुक्तिदाश्रुतिदर्शिता २५ आमनंत्यंडजश्रेष्ठजाबालश्रुतयोध्रुवं शिवलिंगमनभ्यर्च्यनपेयंजलमप्यणु २६ फलंवायद्यदाभोज्यमन्नंवाशंक
रार्पितं भुंजीयाच्छ्रीमहेशाययन्निवेदितमुत्तमं अनभ्यर्च्यमहादेवंयोश्नातिफलमेववासरेतोभक्षिनरकेतिष्ठत्याभूतसंप्लवं २८ यद्यदन्हाकरोत्या
पंपच्चतापत्रयात्मकं तदन्हाप्रतिमुच्येतशिवलिंगार्चनेनहि २९ प्रदोषेयःशिवंदृष्ट्वापरिपूज्यसभक्तिभाक् द्वित्रैर्वाविल्वपत्रैर्वानीरैर्वापिमहेश्वरं
३० सोमवारेतथासायंशतजन्माघनाशनं कालाष्टम्यांकालकालंसायमभ्यर्च्यशंकरं ३१ भूतायांवैभूतनाथंसायमभ्यर्च्यशंकरं नैवेद्यंनिशि
भुक्त्वैवसर्वथागणपोभवेत् संसाररोगनिर्मुक्तःमुक्तयेकल्पतेनरः तथापर्वस्वपिशिवंग्रहणेसोमसूर्ययोः ३३ समभ्यर्च्यामरश्रेष्ठंसर्वलोके

ष्वपि ध्रुवं यावज्जीवं समभ्यर्च्य जीवन्मुक्तो भवेन्नरः ३४ प्रमादादेकदा त्यक्त्वा शिवलिंगार्चनं सुत वापयित्वा शिरःकेशान् प्राश्य गव्यादिपंचकं
३५ रुद्रैर्हौमं हुनेद्देवं स्वरूणा सर्पिषा द्विजः स्वसूत्रोक्तेन मार्गेण कृत्वा पूर्वापरक्रमं ३६ शांभवं भोजयित्वैकमुपोष्याभ्यर्च्य शूलिनं पूर्वा
हापरहे चैव कृत्वा पूजाद्वयं पुनः ३७ भुंजीत शांभवैः सार्धं नैवेद्यं यच्छिवार्पितं तत्पापमुक्तो भवतीत्याह परमेश्वरः ३८ शिवार्चनपरित्या
गो महापापं प्रकीर्तितं निष्कृतिर्विदिता शास्त्रे महापापेन्न कुचिद्द्विज ३९ प्राणांतं न ततो घोरं नरकं प्राप्नुयान्नरः गृहीत्वा नियमं विप्रो शिवलिंगा
र्चनक्रमे ४० वरं प्राणपरित्यागः छेदनं शिरसो द्विज अनभ्यर्च्य महादेवमन्नं नाश्नेत्कदाचन ४१ एवं नियममास्थाय यत्त्यक्त्वा तच्छंकरार्चनं॥
त्यक्तप्राणो न शुध्येत मृतो नरकमिच्छति ४२ तस्माद्दतं द्विजे तो लिंगे पूजनीयः सदाशिवः शिवप्रसादजनकं शिवलिंगस्य पूजनं ४३ भुक्तिदं मु
क्तिदं चापि ज्ञानदं सर्वदा नृणां अवश्यं तद्द्विजातीनामित्याह शशिशेखरः ४४ नान्यदेवैः समं शंभुं पूजनं येद्विघ्ननायकं परावो ब्रह्मविष्ण्वाद्याः
तैः समं पतिपूजनं ४५ न कार्यं सर्वथा सर्वैः न प्रसादकरं हितं मत्वा रुद्रेति मंत्रेण श्रुतिः पूजां निषेधति ४६ सहाह्वानार्चनं शंभोः नैव कु
र्यात्सुरांतरैः नरकावहमेवाद्य नात्र कार्या विचारणा ४७ विश्वाकारा सर्व एव सत्तु विश्वाधिकः शिवः एकः शिवस्तथाद्वैतो द्वैतवान्तीपि तत्र न
तस्मात्संपूजयेच्छ्रां गलिंगमेव पिनाकिनः शिवलिंगार्चनेनैव शिवस्तुष्यति नान्यथा ४९ अन्येपि वहवो धर्माः शिवप्रोक्ताः प्रददाति महेश्वरः ५१
अन्येपि शैव धर्मा ये वक्ष्यामास्ते सार्थनाशकाः करोतु वा यथा जोषं नैते त्याज्यं कदापि च ५२ ॰ प्रसद्दीप्तोक्ता प्रसादजनकं शिवलिंगार्चनं द्विजः ५०
लिंगेर्चितो महादेवो दरिद्राद्यैर्विशेषतः भक्तानां सकलाभीष्टं ५३ इत्येवं समयं कृत्वा वरमा प्राणसंक्षयं पूजनीयः शिवो लिंगे ज्ञानमुक्तिमभीप्सु
भिः श्रीस्कंद उवाच यः पूजयच्छशिकलाविलसत्सुमौलिलिंगं महाशपथपूर्वकमेव विप्रैः प्राश्य पजलं न च फलं न च भोज्यमन्नं लिंगा
र्चनोज्झितिरहो नरकप्रदैव ५४ कः संतरेत्तभवमेतदसारसारं शंभोः पदांबुजसमर्चनतो विहीनः त्यक्त्वा सुरान् रसमनुत्तमचंद्रमौलिलिं
गार्चनेन सकलां श्रियमश्नुते च ५५ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे अष्टमोध्यायः॥ ८ ॥ गरुड उवाच किं वा प्रसादजनकं

महादेवस्यवैमुने तच्चरिष्यामिभक्त्यैवतद्वदत्वंगुरोमपि १ श्रीस्कंद उवाच गरुडस्यवचःश्रुत्वाकश्यपःप्राहतंपुनः विनतातनयंदृ
ष्ट्वाविनतंनियतोमुनिः २ शिवप्रसादजनकंभस्मनोमहिमांवदत् कश्यपउवाच भस्माभ्यक्ततनुर्नित्यंपूजयेदिंदुशेखरं ३ भस्मधारण
हीनानांप्रसादोनैवशांभवः भवेज्जन्मशतेष्वेवद्विजस्यापिविशेषतः ४ भस्मधारणहीनानांज्ञानंनैवोपजायते ज्ञानांगत्वमिदंभस्मस्मृतमीशे
नमुक्तिदं ५ भस्मभस्मेतियोब्रूयात्सतुपापैर्विमुच्यते भस्मनापादपर्यंतंयःस्नातिनियतंसदा ६ सतुसंतरतेघोरंसंसारंदुःखदंनरः द्विजो
वर्णीगृहस्थोवायतिर्वापिवनाश्रमी त्रिकालंभस्मनिरतोदेवदेवप्रसादभाक् भस्मस्नानविहीनात्मा कृत्वाकर्माण्यपिद्विजः ८ नैवतत्फ
लमाप्नोतिकुर्वन्यत्किंचिदप्यवै प्रत्यवैतिद्विजोवापिभवत्येवनसंशयः ९ भस्मप्रभावोवेदांतैःसर्वदाप्रतिपाद्यते अथर्वशिरसिस्वैरंभस्म
प्रोक्तंहिपावनं १० शिरोत्स्थतमिदंभस्मस्नानमापादमस्तकं अग्निरित्यादिभिर्मंत्रैःस्नात्वापापैर्विमुच्यते ११ योवाकोवांत्यजोवापिनित्यंभ
स्मतनुर्भवेत् समहेशप्रसादस्यपात्रंभवतिनिश्चितं १२ द्विजोवाप्युत्तमाचारोभस्मस्नानविवर्जितः योभस्मधारणंदृष्ट्वानाभिनंदतिदुर्मतिः
१३ तस्योत्पत्तौचसांकर्यमनुमेयंविपश्चिता यतिर्वेदांतनिष्ठोपिभस्मधारणवर्जितः १४ पठन्वापाठयन्वापिनैवतज्ज्ञानमाप्नुयात् जीवात्मे
क्यपरंज्ञानंभस्मस्नानेननजायते १५ भस्माभ्यक्ततनुर्नित्यंत्रिपुंड्रपरिचिन्हितः सतपस्वीसदानार्हःसर्वकर्मार्हकोभवेत् १६ त्रिनेत्रदयया
पात्रंपवित्रोभवतिध्रुवं मित्रभूतःसुराणांचभवत्येवनसंशयः १७ भस्मधारणहीनोयःशिवलिंगंसमर्चयेत् नतस्यपूजांगृण्हातिमहादेवः
पराङ्मुखः १८ भविष्यतिनसंदेहःस्वत्युतप्रत्यवैतिच सर्वदासर्वकालेषुभस्मधृक्पावनःशुचिः यःस्नातिस्नानदशकैःविद्यावुध्यापिमानवः
भस्मस्नानाद्विनिर्मुक्तःसोऽशुचिःसर्वकर्मणि २० पवित्रतरमेतद्वैभस्मैवश्रुतिचोदितं श्रौतानलोद्भवंभस्ममहापापनिवर्तकं २१ मुक्तिदं
ज्ञानदंपुंसामग्निरित्यादिमंत्रितं भस्मधृत्वैवसंध्यायामधिकारीनसंशयः २२ अधृत्वायदिनद्भस्मसंध्यांकुर्याद्विजाधमःभस्मधृत्वा
पुनःसंध्यामाचरत्संध्ययोर्द्वयोः २३ श्राद्धंयज्ञंतथाहोमोविवाहोपनयादिकं देवताभ्यर्चनंनित्यंकाम्यंस्वाध्यायतर्पणं २४ सर्वंभस्म

ध्टगेवाशुसर्वेषांफलमश्नुते सतपस्वीसदापात्रंसर्वान्संतारयेन्नरान् २५ भस्मधारणमंत्रेणदुःखंतरतिमानवः अशुचिर्भिन्नमर्यादोभ
स्मधृक्पावनोभवेत् २६ अभक्ष्यभक्षणंकृत्वागत्वागम्यामपिद्विजः भस्मनःस्नानमात्रेणसर्वपापैःप्रमुच्यते २७ वरांहंमूषिकंबालंउन्मत्तं
श्वानरासभौ स्पृष्ट्वादृष्ट्वाद्विजोनित्यंभस्मस्नानंसमाचरेत् २८ उदक्यांसूतिकांदृष्ट्वायःस्नातिशिवभस्मना भस्मस्नानेनपापानांराशिर्वै
भस्मसाद्भवेत् २९ भस्मधृक्सर्वदापूज्योयथाशिवमयोहिसः संध्ययोरथमध्यान्हेनिशीथेभस्मधृक्भवेत् ३० साचारोपिदुराचारोभस्मधृ
क्पावनोभवेत् भस्मत्रिपुंड्रसहितोनित्यमर्चयेतशंकरं ३१ तेनदत्तंजलंपुत्रसाक्षाद्गृण्हातिशंकरः हव्यंगृण्हंतिचसुराकव्यंपितृगणास्तथा ३२
भस्मधारणमात्रेणशिवस्तस्मैप्रसीदति प्रसादःशांकरोयस्यमुक्तिस्तस्यकरेस्थिता ३३ दानंयद्दीयतेदात्रायोगृण्हात्यपिवैद्विजः भस्मधारण
मात्रेणउभयोर्वर्धितंफलं प्रातस्त्यजतियोविप्रोभस्मनापादमस्तकं त्रिपुंड्रधृक्समंत्रैश्चसप्तभिर्निशिपातकैः ३५ त्रियायुषंत्रिपुंड्रांकःरा
त्रिपापाद्व्ययोहति मध्यान्हेपितथाप्राप्तःपातकैर्विप्रमुच्यते ३६ सायंकालेभस्मधारीअपराण्हादद्यात्सदा मुक्तोभवतिगौरीशःप्रियकृत्त्स
भविष्यति ३७ भस्माभ्यक्ततनुर्भवेदथमहारुद्राक्षमालाधरोरुद्राध्यायजपादरःशिवमहापंचाक्षरंसादरः श्रीमत्त्र्यंवकपादपंकजवरे
ध्यायन्विमुक्तोभवेत्पापौघाद्भवसागरात्तु हरमहादेवाश्रयाद्भावतः ३८ लिंगंशांतमपारविल्वजदलैरक्तांवुजैरर्चयन् दुर्भिक्षप्रभवेमहाघग
णनात्तूलानलोवैभवेत् विघ्नाद्रिंत्वथनाशयेज्जनिजरारोगप्रणाशोभवेत् एवंदेवमहर्निशंविभवतोमुक्तिंलभस्वादरात् ३९ इतिश्रीशिवरहस्ये
भीमाख्येअष्टमांशेनवमोध्यायः॥९॥ काश्यपउवाच भस्मनःपंचनामानिश्रुतिगीतानिवैद्विज विभूतिर्भसितंभस्मक्षारंरक्षेतिचक्रमात् १ भासकत्वान
दानेनभस्मैतत्कीर्तितंसदा ऐश्वर्यदानात्साभूतिःभसितंपापनाशनात् २ क्षारंपापक्षरणतोरक्षारक्षणतःस्मृता भस्मनामेश्वरेणाथपंचधेतत्प्रकीर्तितं ३
जावालैर्नितरामुक्तंभस्मपापभयापहं भस्ममुक्तिप्रदत्वाच्चप्रसादकरणंमहत् ४ योभस्मरहितोविप्रःसएवश्वपचोंत्यजः सनित्यसूतकीभूयाद्भस्मधारणव
र्जितः ५ तेनाधीतंतथैवेष्टंजप्तंसर्वंचनिष्फलं आमनंतिसदाभस्मश्वेताश्वतरशाखिनः ६ आमनंतिसदाभस्मअथर्वशिरसिस्थिताः आमनंतिसदाभस्म

वृहज्जावालशाखिनः श्रुतयोभस्ममहात्म्यंवदंतिवहुधाद्विजमुनयोब्रह्मविष्ण्वाद्याभस्ममहात्म्यवेदिनः ८ देवैःसदेवसुधृतंभस्मेदंपावनं
परं ब्रह्मणाविष्णुनेंद्रेणधृतंरुद्रैःसदैवहि ९ देवस्त्रीभिर्धृतंभस्मसर्वदात्रिपुंड्रवत् देव्याचगणपेनैवस्कंदेनचधृतंपरं १० स्त्रीभिर्धार्यमिदं
भस्ममंगलंतद्ध्रुवैनरा सभर्तृकाभिःसततंशिवाराधनसाधनं ११ ज्ञानांगत्वेनकथितंसर्वदापावनंपरं श्रौतंत्रिपुंड्रमेवेदंत्यक्त्वा तन्नरकंव्रजेत् १२
ऊर्ध्वपुंड्रंमृदाकुर्वन्द्विजोपिश्वपचाधमः ऊर्ध्वपुंड्रंभ्रमेणापिनैवकुर्याद्विजःसदा अश्रौतमूर्ध्वपुंड्रंस्यान्नधार्यंसर्वथाद्विजैः ऊर्ध्वपुंड्रेणवःकु
र्याच्छिवलिंगसपूजनं १४ सपापभाक्भवत्येवनात्रसंदेहकारणं शिवप्रसादजनकंभस्मधारणमुत्तमं १५ शिवप्रसादजनकंत्रिपुंड्रपरिधारणं
शिरोललाटवक्षस्सुदोर्द्वयोर्यस्त्रिपुंड्रधृक् सएवप्रियकृच्छ्रेष्ठोमहेशस्यगणेश्वरः योभस्मधारणंत्यक्त्वामृदोर्ध्वपुंड्रधृक्नरः १७ सनरोजारजो
विप्रःसएवश्वपचाधमः भस्मनापूतफालोयःसतपस्वीसतुद्विजः १८ सएवप्रेमसदनंमदनांतकस्यच भस्मधृक्पूयतेपापैर्महद्भिरपिकृत्स्न
शः १९ भस्मफालंत्रिपुंड्रांकंदृष्ट्वाभीतोयमःसदा नृगणाश्चपिशाचाश्चग्रहाश्चैवविनायकाः २० तेनरंनोपसर्पंतिसर्वदाभस्मधारिणं भस्मधा
रणमात्रेणसदाशाम्यंतिवैग्रहाः २१ पंचाक्षरेणयोभस्मअभिमंत्र्यैवधारयेत् आर्द्रैःशुष्कैस्तथापापैर्मुच्यतेनात्रसंशयः भस्मैवपरमंतुर्यपावनंज्ञान
भास्कं योविनिंदतिभस्मेदंसनिंद्यांयोनिमाप्नुयात् २३ भस्मदिग्धत्रिपुंड्रांकंभोजयित्वातुसंभवं सभोजयतिगौरीशंचेनतुष्टोमहेश्वरः पवित्राणांपवि
त्रंहिभस्मैवद्विजपुंगव नभस्मात्पावनतरंत्रिषुलोकेषुविद्यते २५ नभूत्याप्रमदेत्तैवइतिश्रुत्यनुशासनं भस्मनापूजयेल्लिंगंत्र्यंबकेणसमुच्यते २६
सर्वस्मादपिपापेभ्यःसमुक्तोमोचयेत्परान् सजीवन्नशिवत्वामेतिसाक्षाद्रुद्रसमोभवेत् २७ नित्याशुचिमिदंदेहंभस्मनाशुचिभाक्भवेत् भस्मएतद्धि
हायैवमन्यपुंड्रंधरेद्यदि २८ मुक्तिर्विरिंत्वचेद्दृस्यात्तामरेसंप्लविष्यति विषपानेननित्यत्वंयदिविंदेतमानवः २९ भस्मस्नानविहीनोयःसभवेन्मायया
वृतः योभस्मस्नानयुक्तोभवतिसुरनरोसद्विजोवाधमोवानेवान्योभवत्प्रमोदजनकंज्ञानंमहत्प्राप्नुयात् धृत्वोर्ध्वफलकेललाटतटकेयाभ्याममृदादे
रत्तोनिर्दग्धाखिलवंशसंकरमहापापौघदुःखौघयुक् ३० योभस्माभ्यक्तदेहोभवतिजनिजरानाशपापाद्विहीनःपापैस्तापजदुःखभागनिकरात्त्यानमह

हिंदति भुक्त्वासौरम्यमतीवशंकरगणश्रेष्ठोस्य स्यात्कृतिः भूयादेवमहाप्रभावसहितो विप्रो यमुक्तो भवेत् ३१ इतिश्रीशिवरहस्ये भीमाख्ये अष्टमांशे भस्मम
हिमानाम दशमोऽध्यायः १० ॥ कश्यप उवाच रुद्राक्षधारणं पुण्यं शिवप्रीतिकरं सदा प्रसादजनकं साक्षाच्छंभोर्निसंपिनाकिनः १ रुद्रनेत्रसमुद्भूता
रुद्राक्षास्तरवोऽभवन् विदग्धे त्रिपुरे पुरस्थे मीलिताक्षेण शंभुना २ पतितास्ताः भूतले वत्सते भूमौ नरवोऽभवन् द्वात्रिंशदक्षजातीयाः सकलाः सुषिरावृताः ३ ब्राह्म
णक्षत्रियवैश्याः शूद्राक्षा इति विश्रुताः ब्राह्मणाः श्वेतजातीयाः क्षत्रिया रक्तवर्णकाः ४ वैश्याः पीतास्तु विज्ञेयाः शूद्राः कृष्णाः प्रकीर्तिताः तत्तद्वर्णक्रमे
णैव धार्या वर्णैस्तु क्रमात् ५ ब्राह्मणो विभृयान्मूर्ध्नि सर्वांगेषु विशेषतः क्षत्रियोऽपि च वक्षस्सु बाह्वोरपि विशेषतः ६ वैश्यः कंठे वक्षसि च शूद्रो मूर्ध्नि निधारयेत्
ब्राह्मणोऽपि सर्वांगे धार्यं त्र्यंबकेण तु ७ अघोरेणैव मंत्रेण क्षत्रियो धारयेच्छुभान् वामदेवेति मंत्रेण वैश्यैर्धार्याः सदाक्षकाः ८ शूद्रः शिवेति नाम्ने
व धृत्वा मुक्तो भविष्यति यतिस्तु प्रणवेनैव स्त्रीणां पंचाक्षरेण तु ९ स भक्तः कार्कंठदेशे धृत्वैकं चाक्षमुत्तमं पाकादिकरणे योग्या रजसापि परिप्लुता रक्ते
स्वर्णेन वा धार्या रजतेनाथवा सदा सूत्रेण क्षौमजेनापि सर्वैर्धार्या यथारुचि अशुचिर्वा शुचिर्वापि सर्वावस्थां गतोऽपि वा रुद्राक्षमालाभरणः पवित्रो
नात्र संशयः १२ त्रिनेत्रप्रियपात्रं स इति शास्त्रविदां मतं एकाननः शिवः साक्षात्तं धृत्वा शिवसाद्भवेत् १३ द्विमुखं पार्वतीशंभुः तं धृत्वा पापमोचितः त्रि
मुखो वन्हिरूपात्मा तं धृत्वा भस्मपापभुक् १४ चतुर्वक्त्रः स्वयं ब्रह्मा तं धृत्वा ब्रह्मलोकगः पंचवक्त्रः स्वयं शंभुः तं धृत्वा पंचमो पातकैः १५ विमुच्यते तत्क्षणे
नैव वसाक्षात् प्रसादभाक् षडाक्षं स्कंददैवत्यं धृत्वा स्कंदस्य लोकगः १६ सप्ताननं स्वयं देवी तं धृत्वा वन्हिलोकगः अष्टाननं तु रुद्राक्षं अष्टमूर्तेः
प्रियं सदा १७ तं धारणादष्टवसुलोके सो मोदते चिरं नवाननं स्वयं भीमः भीमपापैः प्रमुच्यते १८ दशास्यं च सदा धृत्वा न यामीं याति यातनां एकादशास्यं नं
रुद्राक्षं नल्लोके निवसेच्च धृक् १९ द्वादशास्यं सोम धाम प्रदोषाघविनाशकं त्रयोदशास्यं पापघ्नं धृत्वा विष्णुपदप्रदं २० चतुर्दशास्यं रुद्राशिवज्ञानप्रदं
शुभं एवं चतुर्दशमुखं रुद्राक्षं धारयेत् क्रमात् २१ सर्वपापैर्विमुक्तश्च पश्चान्मुक्तो भविष्यति द्विजो वा श्वपचो वापि यो रुद्राक्षाणि धारयेत् २२ स तप
स्वी स मूर्धन्य वद्यो मुक्त एव हि सदाशिवप्रसादस्य पात्रं नात्र विचारणा २३ मुखे मुखं न संयोज्य धार्या रुद्राक्षमालिका नो चेत्तत्तपसां हानिः भविष्यति

शिवाज्ञया २४ द्वात्रिंशत्कंठस्थानेतुषट्षट्कर्णयुगेनथा बाह्वोः षोडशधार्यो वै मणिबंधेतुद्वादश २५ वक्षस्यष्टाधिकशतंभ्रुवोश्चैकं शिरस्यपि द्विचत्वारिंशतिंमूर्ध्निसंग्रहोयंप्रकीर्तितः २६ सहस्रविभ्रयान्नित्यंमालावायावत्तोभवेत् कंचुकंवायथाजोषमकुटंमूर्ध्निधारयेत् २७ सहस्रमधमंप्रोक्तंइंद्रलोकप्रदायकं दशसहस्रकंमर्त्यः सोमलोकमवाप्नुयात् २८ अयुतंसूर्यलोकस्थः लक्षेणब्रह्मलोकगः कोटिंतुबिभ्रयाद्दक्षानूसचविष्णुमयोभवेत् २९ अनंताक्षस्यधरणेशिवएवमविष्यति रुद्राक्षमालयाजप्तोमंत्रोनंतफलप्रदः रुद्राक्षधारणेलज्जायेषामस्तिस्वभावतः तेसर्वेजारजाज्ञेयाअब्राह्मण्याः सदैवते ३१ रुद्राक्षैतिवदन्मर्त्योदशगोदानजंफलं प्राप्नोतिशिवसारूप्यंतेनदेहेनमुच्यते ३२ मृण्मयेनापिरुद्राक्षंकृत्वायत्नेनधारयेत् रुद्राक्षधारणाद्रुद्रोभवत्येवनसंशयः ३३ तेषामेवात्मविज्ञानंयेवैरुद्राक्षधारिणः भिक्षवोपिचरुद्राक्षान्धृत्वामुक्ताभवंतिहि ३४ रुद्राक्षमालाभरणःशिवलिंगंप्रपूजयेत् तत्कृतामेवतांपूजांगृण्हातिपरमेश्वरः ३५ अरुद्राक्षकृतांपूजांनगृण्हातिमहेश्वरः योभस्मधारीनियतंसरुद्राक्षधरोभवेत् ३६ अपुंड्रधरश्चापिनरुद्राक्षाणिधारयेत् पुंड्रंनरोयोधृत्वैवरुद्राक्षमपिधारयेत् प्रस्तुतोनारकीभूयादितिजाबालिकीश्रुतिः योरुद्राक्षोरुहारःसितभसितमहापुंड्रमस्तोरुबाहुःसंपूज्यप्रमथाधिनाथमजरंभक्त्याथमुक्तिंलभेत् भूयाच्छंकरकिंकरोपिसमहारुद्राक्षभस्मांगकोमाराऽरातिपदांबुजार्चनरतःकिंकिंनविंदेत्सहि ३८ योरुद्राक्षोरुवक्षाःसितभसितलसत्फालवाहुक्षिमूलोलीलालाशीलाहिफालज्वलदनलकुलज्वालमालात्तशूलं ध्यायन्तुध्यानिशं ध्यायतिगतिरहदाधन्यमानोरुमलंपलोका ध्यक्षानुशिक्षाक्षपितकलुषधीर्मुक्तयेशंभवाय ३९ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेरुद्राक्षमहिमानामएकादशोध्यायः ११॥ मुनिरुवाच श्रीरुद्रमंत्रान्प्रजपेन्नियतंभस्मधार्यपि रुद्रमंत्रंजपन्विप्रोध्यायेद्देवमुमापतिं १ वेदानामध्यगंसाक्षाद्यजुषामध्यगंपरं शतशाखागतंत्वेतद्रुद्रमंत्रंशिवप्रियं २ रुद्रप्रियकरंसाक्षाद्रुद्रमंत्रंश्रुतिश्रुतं रुद्राध्यायार्थविज्ञानीपदार्थज्ञानवान्नरः ३ नमोंतेनशिवंध्यायन्सर्वपापैःप्रमुच्यते नमोंतेनचतद्रूपधारिणंशिवमेवहि ४ ध्यायन्महेशंतद्रूपंपतीनांपरमेश्वरं सर्वेषामप्युमाकांतंनितांतंशांतमव्ययं ५ रुद्रमध्यगतैर्मंत्रैर्नमोंतैरुभयोरपि एकद्वित्तोनमस्कारैःध्यायेद्देवंपिनाकिनं ६ सर्वदेवाधि

शिवरहस्य०
अ०१२
१२

देवेशंविश्वेशंरुद्रसूक्ततः ध्यायन्मंत्रान्जपेद्रुद्रान्तत्तदर्थावबोधतः ७ श्रीरुद्रमंत्रंप्रजपेत्भस्मधारणपूर्वकं भस्मधार्यधिकारीचतथारु
द्राक्षधार्यपिरुद्राध्यायजपेयोग्यास्तएवभुवनेद्विजाः नान्यपुंड्रधराःसर्वेनाधिकारिणएवहि ९ प्रस्तुतोरुद्रमंत्रांश्चप्रजपन्पापभाक्भवेत् य
स्तुरुद्रान्जपेन्नित्यं ध्यायमानोमहेश्वरं १० सर्वपापविशुध्यात्माशिवत्वमुपगच्छति स्तेयंकृत्वाब्रह्मवध्यांचकृत्वामद्यंपीत्वागुरुदारांश्चगत्वा भस्म
च्छन्नोभस्मशय्यांशयानोरुद्राध्यायीमुच्यतेसर्वपापैः ११ एकवारंजपन्रुद्रंपापैर्मुक्तोभविष्यति द्वितीयवारंजप्त्वैवरुद्रंध्यायन्महेश्वरं १२ गाणपत्य
मवाप्नोतिशिवस्यपरमात्मनः तृतीयवारंप्रजपन्शिवेलीयेतसर्वदा १३ एकादशानुवारंयोरुद्रमंत्राञ्जपेद्द्विजः शंचमेत्यादिचजपन्क्रमादेकादशा
वृत्तं जपाल्लिंगेभिषेकोवैशंभोःप्रियतमोमतः वस्त्रपूतेनतोयेनअविच्छिन्नांप्रकल्पयेत् १५ धारांवृत्तांप्रकल्प्यैतशिवलिंगेद्विजोत्तमः रुद्राध्याये
नाभिषिंचेज्जपाद्दश्युत्तमोभवेत् १६ जपाद्दशगुणप्रोक्ताअभिषेकोमहेश्वरे चंदनैर्बिल्वपत्रैश्चपूजयेदिंदुशेखरं रुद्राध्यायादिनाम्नांचपूजयेत्पर
मेश्वरं रुद्रैस्तुवीतदेवेशंसांबंसंसारभेषजं १८ स्तुत्वारुद्रैर्महादेवंसन्निधौगणपोभवेत् रुद्रैर्होमंप्रकुर्वीतचरुणामधुसर्पिषा १९ नामभिर्देवदेवस्य
स्वाहांतैश्चएकाथक् गृहारिष्टेस्वप्नदुष्टेउत्पातक्ष्मादिकंपने २० देशोपसर्गेदुर्भिक्षेराजचोराद्युपद्रवे प्रजापशुमृतौचापिजपहोमार्चनंचरेत् २१ रुद्रैर्मंत्रै
रस्तुतश्शंभुर्ध्यायन्देवंपिनाकिनं ब्राह्मणैःशांभवैरेवभस्मरुद्राक्षधारिभिः २२ कारयेद्विधिवद्राजाधनाढ्योवापिकश्चन गावोभूमिंहिरण्यादिप्रदेया
शक्तिसारतः २३ शांभवेभ्यःसदारोगतापपापैःप्रमुच्यते रुद्रमंत्रजपेयोग्याशांभवाएवकेवलं २४ अतिरुद्रविधानंवामहारुद्रमथापिवा कुर्यात्स
र्वोपसर्गेभ्योनभयंजायतेक्वचित् २५ घृतधारांपातयेत्ताविच्छिन्नांरुद्रमंत्रतः वन्हौकुंडेशिवंध्यात्वाशांभवाश्शोत्तरैश्शतैः २६ एकादशानुवृत्त्यैवंम
डलंधनधान्यवान् मुक्तिःशिवमयोभूयादकामःकामःवान्यदि २७ सर्वकामानवाप्नोतिवत्सरंतेनसंशयः गोष्ठेवापिनदीतीरेरुद्रक्षेत्रेशतोत्तरं
२८ जप्त्वैतत्कर्मकृत्वापिफलंविंदेद्दशोत्तरं क्षीराभिषेकंलिंगेतुरुद्रमंत्रैःसमाचरेत् २९ नभूयस्तन्यपोमातुःभविष्यतिनसंशयः योरुद्रैर्वानमस्का
रंप्रदक्षिणमथापिवा ३० कुर्याच्छिवालयेशंभोःसंनिधौसतुमुक्तिभाक् रुद्रमंत्रैस्त्रिकालंयःस्तुवन्नर्तनमाचरेत् संशंभोर्गणपोभूयाद्वत्सरेण

रामः
१२

नसंशयः अविमुक्ते शिवक्षेत्रे धन्येष्वपि यथा बलं ३२ रुद्रं जपन् प्रमुच्येत पापेभ्यो नात्र संशयः यो बिल्वमूले रुद्रांश्च जपेद्ध्यायेन्महेश्वरं ३३
स कोटिरुद्रसाम्यस्य फलं लब्ध्वा विमुच्यते जाबाला आमनंत्येवं महिमा रुद्रजापिनः ३४ किं जप्येनामृतत्वमिति रुद्रैरेवेति सा श्रुतिः यतिश्च प्र
जपेन्नित्यं वनी वर्णी गृहीतथा ३५ यावन्न मोनं तु यतेः अन्यत्तु गृहमेधिनः यत्र स्थितो रुद्रजापी तत्र शंभुः स्थितः सदा ३६ तस्मै वित्तं शोभवाय
दत्तं तच्छंशवे सदा गां भूमिमथ वासो वा धनं धान्यं हिरण्यकं ३७ दत्वा शिवप्रसादस्य पात्रं श्रीरुद्रजापिने एकवारं जपन् रुद्रं तद्ग्रामे शांतिमृच्छति
ग्रामे अस्मिन्ननातुरमिति मंत्रार्थपारगः शतवारं तु नगरे पुरे युतजपाद्भवेत् तत्र स्थानां शुभं भूयाद्यत्र रुद्रजपो भवेत् कुंभं संस्पृश्य यो रुद्रं सोदकं
प्रजपन् द्विजः ४० स्नापयीत वरो गार्त्तरोगी रोगैः प्रमुच्यते वंध्या कुमारं सूते चातीव प्रेमास्पदं स्थिरं ४१ एवं रहस्यमनघं शतरुद्रमंत्रजप्याभिषे
कनियमैः शिवपूजनेन तस्मै प्रसीदति सदा शशिखंडमौलिराखंडलाजहरिवंदितपादपद्मः ४२ रुद्राध्यायजपानुरक्तहृदयो रुद्राक्षभस्मादरो जप्या
वाप्यभिषिंचवा शशिमहाचूडोरुलिंगं सदा मूढो वाप्यथ पंडितो यतिवरो भूयाच्छिवाग्रेसरो विष्णुब्रह्ममरुद्गणार्चितपदो नंदीशतुल्यो गणः ४३ इ
ति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे रुद्राध्यायप्रशंसा नाम द्वादशोध्यायः १२ ॥ काश्यप उवाच श्रीविल्वाराधनस्यापि महिमां ते वदाम्यहं ॥
शृणुष्व सावधानेन प्रसादप्रदमीशितुः १ विल्वः पूर्वं शिवेनैव मनसा कल्पितस्तरुः संसारसागरोत्तारहेतवे पत्रपूजनैः २ पापतापविनाशा
य कैलासाचलतो हरः समानीयाथ भूभागे स्थापयामास लीलया ३ नमाह गौरी विनयाच्छशिशेखरमीश्वरं श्रीगौरी उवाच आनीतोयं तरुः
शंभो भूभागे केन हेतुना तव प्रियकरो नित्यं कैलासे पर्वनोत्तमे ४ रत्नालवालमध्यस्थो नन्मूलेषु स्थितं त्वया यथा मयि तथा प्रीतिः विल्वेस्मिन्
वशंकरः ५ सर्वदा सर्वकालेषु मया संपूजितो भवान् कैलासमौलिलिंगेषु कैलासाख्येषु शंकर ६ एतत्पत्रैर्महादेवं कोमलारक्तजैर्दलैः स
र्वेषां सुलभः केन हेतुना क्रियते तरुः ७ श्रीस्कंद उवाच इत्थं देव्या वचः श्रुत्वा स गौरीरमणो हरः उवाच सर्वहितकृद्देव्या पद्मानन प्रियं ८ अ
क्षेवीक्ष्याथ तामाह संफुल्लमुखपंकजः श्रीईश्वर उवाच धन्यो मान्येत्वया पृष्टं मम मन्ये मनोरथं तच्छृणुष्व महादेवि रहस्यमिदमद्भुतं ९ गो

शिवरहस्य० पंहृचंममेदंहिनप्रकाश्यमिदंत्वया ममनेत्रसमुद्भूतोमार्त्तंडश्चंडविक्रमः १० सर्वेषांतेजसोराशिरीशानात्मकएवसः सचतुर्दशलोकोस्यत्तमोनाशायकल्पितः ११
अ०१३ चंद्रोप्यौषधिराट्कान्तोममसव्योस्तुनेत्रकः अतिफालतलोभूतनयनेनालोकदाहकृत् १२ नतुपापविनाशायकल्पितःकश्चनामरः तदर्थंचिंतयित्वाहम
स्रक्षंविल्वमेवहि १३ ममप्रियकरोनित्यंतरुराजोयमीश्वरि यथात्वयिसदाप्रीतिर्विल्वेप्यस्मिंस्तथाममः १४ मद्रूपोवृक्षराजोयंवृक्षाणांपतिरस्म्यहं रुद्री
१३ तोहमीशेतिपापभेदायसृष्टवान् १५ वक्तूचब्राह्मणेनोक्ताज्योतिर्विल्वेतिपार्वति यतोमदस्त्रसंभूतआदित्यःसमजायत १६ विल्वोममांशसंभूतउभयोर्जनक
स्त्वहं सोमोहमेवजनकःसर्वेषांश्रुतिचोदितः ब्रह्मणोजनकश्चाहंविष्णोरिंद्रस्यपार्वति पवत्तोजनिताचाहंद्यावापृथ्व्योरहमेवहि १८ मत्तोयतोभवन्विल्वआदि
त्योपिमहेश्वरी वेदेपियजुषोभागेप्रोक्तआदित्यसोदरः १९ तमोनाशायसृष्टोयमादित्यस्तपतांवरः पापनाशायसृष्टोयंविल्वोभूतलमाश्रितः २० पापानां
पापिनांवापिदर्शनार्चनतःस्वयं पापंहरतिवृक्षोसौदर्शनस्पर्शनार्चनैः २१ त्रिदलंविल्वपत्रंचत्रिगुणात्मकमेवहि ब्रह्माविष्णुश्चरुद्रश्चवृक्षपत्रक्रमेस्थिताः
तस्मादयंवृक्षराजोमत्प्रियःपापनाशकः सर्वेषांसर्वपापानिनाशयत्येवकृत्स्नशः २३ यथातमोगुणंकृत्स्नंनाशयेद्दिविसंस्थितः तथाभूमिगतोविल्वोपापनाश
यशंकरि २४ लोकानांपापनाशार्थंसमानीतोमयाम्बिके कैलासमौलितोविल्वःपत्रेणार्चितुमांजनाः २५ इत्येवंकृपयापापान्दृष्ट्वानरकदुःखितान् ससुरा
न्मानवांश्चापिमुनीनपिमहेश्वरि २६ लोकपापानुतापेनसमानीतोभुवंप्रियं अर्चंतिमांसुकृतिनोविल्वपत्रैःत्रिशाखकैः २७ कोमलारक्तकैर्वापिशुष्कैःप
र्युषितैरपि तेनमुक्तिंप्रयांत्येतेविल्वैर्लिंगार्चनेनमे २८ विल्वपत्रार्चनाभावेममपूजैवनिष्फला सर्वोपचारयुक्तापिविल्वपत्रविवर्जिता २९ तस्मात्वि
ल्वार्चनेनैवसर्वेषांमुक्तिदोह्यहं धन्यःपूजयतेविल्वैर्धन्योमामभिवीक्षते ३० नाधन्यैःकीर्तयेन्मांहिपूजनेतस्यकाकथा योविल्वपत्रंसंगृह्यारक्षतिप्रीति
मानसः ३१ मत्पूजार्थंमहादेविशुष्कंपर्युषितंतुवा त्रिपत्रमेकपत्रंवापातयेल्लिंगमस्तके ३२ तेनस्वयंशक्रोप्येवमदग्रेक्रीडतेगणः एकेनापिचविल्वेनसम्य
क्संपूजेदिमां ३३ समुक्तोमोचयेदन्यानितिविद्धिमहेश्वरि सर्वपुष्पात्प्रियतरंपत्रैर्वापरमेश्वरि ३४ विल्वपत्रैस्सदादेवियथाप्रियतरोगुहः तथाविल्वार्चनेनैव
सर्वेषांमुक्तिदोस्म्यहं ३५ कृतानंतमहापापोप्यनायासेनमुच्यते विल्वपत्रैश्चसंपूज्यमल्लिंगमभिवीक्ष्यते ३६ प्रातःसंगवमाध्यान्हेसायंचापिप्रदोषके सोम

रामः

वारेचतुर्दशंपापर्वेस्वपिविशेषतः ३७ विल्वपत्रैःसमभ्यर्च्यसर्वासिद्धिंलभेन्नरः ममप्रियतरोभूयान्मत्प्रसादंचविंदति ३८ सुवृत्तोवापिदुर्वृत्तोविल्वैरभ्य
र्च्यमांशिवे ससर्वपूज्योभवतिसतपस्वीमुनिःस्वयं ३९ सर्वतीर्थेषुसस्नातःसर्वयज्ञेषुदीक्षितः सचसर्वमहानंदस्सचमोहत्तमोमम ४० योविल्वपत्रश
तकैःसहस्रैरपिलक्षकैः कोटिभिर्विल्वपत्राणांसमर्चनकरोभवेत् सएवधन्योमान्योमेगणेंद्रोरजताचले योविल्वंयोषयेद्भक्त्याजलदानादिभिःशिवे ४२
सचवंशयुतोदेविमदग्रगणपोभवेत् विल्वपत्रैर्विल्वमूलेलिंगमभ्यर्चितंमम ४३ तेनत्रैलोक्यलिंगानिपूजितानिनसंशयः येविल्ववनकर्त्तारोविल्व
चंदनतत्पराः ४४ विल्वालिंगनसंसक्ताःविल्वदर्शनतत्पराः प्रातरुत्थाययोविल्वंप्रयातिप्रीतिपूर्वकं ४५ सकृत्तानंतपापोपिमुच्यतेसोपिमुक्तितः भ
सघृत्वैवविल्वानांसर्वमेवंसमाचरेत् ४६ विल्वयुक्तंवनंधन्यंतत्संगाद्वृक्षजातयः वल्लिगुल्मादयःसर्वेममलोकेवसंत्यपि ४७ स्थावरंत्वपरित्यज्यभ
वंतिगणपोत्तमाः विल्वस्यैवानुषंगेणशांभवस्यांगसंगवत् ४८ विल्वपत्रार्चनकरोधत्तोदकनुन्नको शंखचक्रादिचिन्हैस्तेभवंतिपृथिवीभुजः ४९
विल्वमूलेप्रजप्तोयोमंत्रःकोटिगुणोभवेत् शांभवंभोजयेद्देविविल्वमूलेविशेषतः ५० सदरिद्रोपिसंपन्नोभवत्येवनसंशयः पादौप्रक्षाल्यनत्वाथभस्म
धारणपूर्वकं ५१ मंत्रमेनंसमुच्चार्यविल्ववृक्षंसमारुहेत् नमस्तेविल्ववृक्षायनवारुणदलायच पत्रैस्तेशिवपूजार्थंगृण्हाम्यद्यक्षमस्वमे ५२ इतिप्रार्थ्य
महावृक्षंगृण्हीयात्पत्रमेवहि उत्तराग्रेणपत्रेणपूजनीयोहमेवहि ५३ किंपुनर्वहुनोक्तेनविल्वपत्रंममप्रियं श्रीस्कंदउवाच इत्युक्त्वागिरिराजराजत
नयामालिंग्यमोदान्वितोकैलासेवरविल्वमूलनिलयेशंगेहिलिंगेमुदा तत्पत्रैःकुसुमैस्तदीयमगजाकांतोभिजिघ्रंस्थिरोविल्वार्चाफलमेतदेवभग
वान्जानात्यसौशंकरः ५४ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेविल्ववृक्षमहिमोनामत्रयोदशोध्यायः॥ १३॥ ॥ काश्यपउवाच ॥ शिवप्रसाद
पात्रंश्रीशांभवःकेवलंभवेत् शांभवाःशंभुभक्तायेभस्मरुद्राक्षधारिणः १ शिवलिंगार्चकाःशैवाःशिवैकपरदेवताः शिवलिंगैकशरणामरणेपिप्रतिक्षणं र
तानेसुरार्चनरताःशांभवाएवकेवलं शिवैकशरणाएवमनोवाक्कायकर्मभिः ३ शांभवानविधातारंनविष्णुनामरान्परान् मनसापिनमन्यंतेमन्वतेतृण
तुल्यतां ४ शिवभक्तिसमापन्नासंपन्नाएवतेसदा दुर्लभाशांभवीभक्तिःप्रसादादेवसाभवेत् ५ प्रसादःशांकरःश्रेष्ठोभविष्यतिशिवाज्ञया भावानांभावनाद्दृढाः

भवः प्रीतो भविष्यति ६ नाभावो विद्यते तस्य सदा संसारवर्तिनः संसारोत्तारका एव शांभवाः शंकराज्ञया ७ विष्णुब्रह्मादयो देवा मुनयो मानवास्तथा असुराः
किन्नरा वापि सुधाकरधरार्चकाः ८ ते सर्वे शांभवा एव भस्मरुद्राक्षधारिणः शिवैकपरदेवा ये ते सर्वे शिवचेतसः ९ शिवप्रणामपरमा भक्ता मुक्तिपथे स्थिताः
पंचाक्षरपरा देव श्रीरुद्राध्यायजापकाः १० शिवलिंगार्चकाः शैवाः सततं भवपूजकाः भावेन भगवत्प्रीता भवोद्भवपदार्चकाः ११ भगवानेक एवेति ये विज्ञा
यार्चयंति ते त्रिपुंड्रभस्मनिटिलाः सदा कौटिल्यवर्जिताः १२ निटिलानलपूजैकपरा मुक्तिं व्रजंति ते शर्वीशधनतो हाराः विष्णुब्रह्मादिपूजिताः १३ शिवमेकं
यजंत्येव लिंगे बिल्वादिपल्लवैः अभिषिंचय सदा नीरैः प्रातःसायं विशेषतः १४ प्रदोषे सोमवारे च चतुर्दश्यष्टमीषु च नक्तं नैवेद्यभोक्तारो नियमाच्छंकरा
र्चकाः १५ नित्यप्रदोषनियता यताहाराः शिवार्चकाः भक्ताः शैवा द्विजा एवमन्ये वर्णा अपि क्रमात् १६ स्त्रियो वा संकरा वापि पूज्य लिंगं पिनाकिनः शांकरा
एव ते सर्वे शिवलिंगार्चनोद्यताः १७ पंचास्य लिंगं पंचास्यध्यानपूर्वं यजंति ते बिल्वांबुजैः समभ्यर्च्य प्रातःसायं विशेषतः १८ हारदारितपापौघ अमोघाः शं
करार्चकाः पंचाक्षरेण यो लिंगं बिल्वैरभ्यर्च्य शूलिनः १९ पंचत्वं प्राप्नुयाज्जातु पंचपापैः प्रमुच्यते शांभवा एव संपूज्याः शिवार्चनपरायणाः अनभ्यर्च्य महा
देवं मरणेपि प्रतिक्षणं नान्नं फलं वा गृण्हंति नियता मितभाषिणः २१ त एव शांभवा विज्ञेयाः शिवलिंगैकपूजकाः तद्रंगसंगतः सद्यः पापभंगः प्रजापते
२२ मातंगकृत्तिवसनपादपूजाप्रभावतः तेषु दत्तं तथा शंभुः स्वयं गृण्हाति शंकरः २३ शिवक्षेत्रे भोजनीयाः पूज्याश्च शिवयोगिनः अन्यवर्णेष्वपि
च ये भस्मरुद्राक्षधारिणः २४ शिवलिंगासक्तकं गनीलकंठपदार्चकाः अविमुक्ते च केदारे रुद्रकोटौ महेश्वरे २५ भृगुतुंगे नर्मदायामोंकारे च प्रभासके
पुष्करे नैमिषारण्ये महाकाले त्रियंबके २६ गोकर्णे च कुरुक्षेत्रे श्रीशैले पुंडरीकके दक्षिणे तत्र कैलासे वृद्धाद्रौ वरुणाचले २७ गोपर्वते सह्यमूले
श्रीकंठे रत्नपर्वते श्रीमातृशिखरे चैव गजारण्ये पयःप्लवके २८ कुंभघोणे र्जुने चैव मायूरे श्वेतकानने कमलालयसंज्ञे च वेदारण्ये च सेतुके २९
हालास्ये वेणुविपिने ताम्रपर्णीस्तटद्वये सह्यापगारोधसि च क्षेत्रनिष्ठाश्च शांभवाः पूजनीयाः प्रयत्नेन शिवप्रीत्यर्थमेव हि यत्र भुक्ते शांभवस्तु शिवो
भुंक्ते न संशयः हि ३१ पूज्याः सदा दानमानैः तेन प्रीतो भवेच्छिवः शिवभक्ता महोत्साहाः शिवार्चनपरायणाः ३२ शांता दांता जितक्रोधाः शिवनामजपादराः

भस्मरुद्राक्षसंपन्नाः शिवोत्कर्षार्थवादिनः ३३ वेदितं कालतत्त्वस्य शिवक्षेत्रनिवासिनः अन्यक्षेत्रप्रत्यभिज्ञारहिता भूतिभूषिताः शिवमेव यजंत्येव सर्वकालेषु
सादरं त एव वैदिका ज्ञेया श्रौतपुंड्रादिधारिणः ३५ श्रौतलिंगमिदं प्रोक्तं भस्मरुद्राक्षधारणं रुद्राध्यायजपं श्रौतं श्रौतः पंचाक्षरीजपः ३६ रुद्रलिंगार्चनं श्रौतं श्रौ
तं शिवजपस्मृतिः श्रौतधर्मार्थनिरताः शांभवा एव केवलं अश्रौतमूर्ध्वपुंड्रस्यान्न तत्त्वार्यैः शिवार्चकैः नान्यक्षेत्रे वसेन्नित्यं शांभवः शंभुतत्परः ३८ नान्यसुरं
वापि नरं किन्नरं वा यजेत्स हि सूत उवाच एवं ये शिवभक्तिभावनिरतास्ते शांभवाः केवलं दारोदारकुमारवृंदसहिताः श्रीशंकरार्चारताः मारापारशराभिघातरहि
ताः वेदांतसारादरः घोरापारमहौघसंसृतिमरं हारास्त्यजंत्येव ते ३९ अन्ये भूभाररूपाः शिवपदकमलध्यानहीना नमान्याः समान्याः शिवमसुदग्धवपुषो जारो
पजारोद्भवाः वीरा वाप्यसुरासुरा नरवराः ते वानराः पामराः मारारातिपदांबुजोज्झितमनास्तत्राः सपापा हि ते ४० इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे चतुर्दशोध्यायः १४
काश्यप उवाच शंकर एव देवेशं स्तुवंति भवभाविताः भावनामात्रसुलभो दुर्लभो ह्यकृतात्मनां १ शिव एव हि सर्वेषां शासकस्तारकः सतां स एव भक्तिभावेन पूजितो
भुक्तिमुक्तिदः २ शिवनैवेद्यपुष्टांगाः संतुष्टा येऽष्टपूजकाः निष्ठावंतः कृपावंतः शिपिविष्टपदाश्रयाः ३ तुष्टाः पुष्टाः सदा भक्ताः तेजिष्ठाः शिवपूजकाः स्तुवंति स्तो
त्रवर्णेनन्दंतीशाग्रतो मुदा ४ भस्मरुद्राक्षकवचाः जटामुकुटभूषणाः रुद्राक्षवरकोटीरा रुद्राक्षांगदकंकणाः ५ साश्रुनेत्राः स्खलज्जिह्वाः ते नृत्यंति शि
वाग्रतः सोत्साहकरतालैश्च शांभवा लिंगपूजकाः ६ शिवलिंगप्रभासंतः कृपापांगावलोककाः अनंगवरमातंगभंगसांगातरंगकाः ७ न संति शांभवा एवं त
स्तुतिं शृणु सादरं एवं स्तुवंति यं शंभुं शांभवाग्रेसरा हिते ८ सर्वदा वा प्रदोषे वा सायंप्रातः पराण्हके त एव सर्वभाग्यानामाकराः शंकराद्दिने ९ हे गौरीरमणारुणाच
लपते तूर्णममाभ्यर्णगं मृत्युवारय तारयाशु दुरितात्संपूर्णदृक्संगतः घोरापारभवार्णवाज्जनिजरारोगानुतापैरपि शंभो मे मरणक्षणेपि शरणं यत्पंकजाविक्षणं १०
दिव्यश्रीचरणांबुजं हृदि सरोजीवाच्च नो पैतु ते हे गौरीकुचचारुशैलशिखरापारादरस्वांतर मारोद्दामसुदर्पसर्पकुहरापारव्यथा संहर हे काकोदरभूषभूतिद
महीध्रकृद्धुर्यबाणासन मथ्यत्सागरसंभवोत्तमगरश्रीनीलकंठ प्रभो पाहीशानदयानिधान भगवन्कारुण्यतो मां सदा हे चंद्रद्युतिकोटिरंजितजटाकोटीरजू
टीलसद्देव श्रीतटिनीतरोत्तमपयोभूते भचर्मांबर १२ हे कारुण्यप्रभुवर्यघोरदकं महावेदोक्त हेषास्तुति त्रुट्यद्दिक्तटसंभ्रमोरुनटनापाटीरपंकांकित पाहींद्र

स्तुतकोटिकोटसदृशंमामीशसर्वेश्वर हे शूलोद्यतहस्तमस्तकलसच्चंद्रोरुगंगाधर १३ स्वामिन्देवकिरीटकोटिविलसत्पादांबुजाबाद्य मां मुक्ताशस्तसमस्तभीति
दमहाकोलोरुदंष्ट्राधर वित्रस्ताखिललोकरक्षक महाशास्तुःपितः पाहि मां हे गंगाबुतरंगसंगसुमहादिग्गोत्तमांग प्रभो १४ मातापोतमिवावभूतिविलसत्सर्वांग
रागावमांदिग्गोत्तुंगभुजंगसंगसुमहानंदांगलिंगांतर पापेभ्यःसुपतंगनेत्रकरुणादृक्संगतः पाहि मां हे फालाक्षमहेश्वरस्मकरुणामूर्ते ध्वराध्यक्ष मां वीक्षावि
क्षितमन्मथांगसुमहादक्षोरुशिक्षाकर तत्पक्षांतरदेवलोकक्षकरदनध्वंसीकृताधोक्षज पाह्यक्षेशवराश्रय त्रिभुवनाध्यक्षप्रभो पाहि मां अक्षापारदयाघनां
तरदृशासंवीक्ष्यमांसर्वदा १६ हे शंपोपमसुंदरोरुसुजटासाम्राज्यनिधीरक प्राज्याज्यप्लुतवन्हिचक्रहवनप्राचुर्यराज्यप्रद भैषज्योत्तमदेवदेवसुमहापापा
न्वितेमय्यपि हृत्तापेनदिवानिशंप्रदहते शंभो नु कंपां कुरु १७ हे कालांतक शांतिदांतिनिरतस्वांतांतरंगस्थित मत्तानंतजगत्सुरांतरसुहृत्संसारतांतं हि मां
भ्रांतंभीतमशांतबुद्धिमनिशंकामांतरंगंसदा मां रक्षाशु दयारसोत्तरमुमाकांतप्रभो शंकर १८ हे शंकर स्मरहरांधककालशत्रो संसाररोगहरवैद्यसुरोत्त
माद्य पाहाद्वयश्रुतिशिरस्तुतपादगद्यपद्यस्तुतप्रकटितं सुगतेरभेद्य १९ विद्युत्सुचंचललललन्नरदेहमेतत्त्वद्ध्यापिनेपादयुगंनभजामिमुग्धः हे
व्यालमालगरशोभितकंठमूलदिव्यत्रिशूलकरकालककालादिलील २० कोलाहलध्वनिकरोत्तमफालमूलज्वालानलायितपुरत्रयतूलशंभो
पाहींदुधामसुललामजलोत्तमांगमालायिताब्जजकपालतलातलस्य २१ पातालजालप्रपदद्विजवालपाल हे विश्वाधिकविश्ववंद्यचरिता मे
यामपध्वंसककायापायमपाकुरुष्व भगवन्मायांधकारं हर मे यं ते पदपंकजं प्रतिभवेप्येवंमुहुःस्निग्धतां हे यामेविषयाभवंतु नियतं हे यं न ते
पूजनं २२ मीनध्वजाजिष्णुपरंपरिखिन्नचित्तं हृत्तापचित्तमथवित्तगणार्जनेन पित्तोल्बणेनसततंभ्रमतेंतरंगमाशाशमाय भगवन्करुणांकु
रुष्व २३ सौवर्णवर्णसदृशोत्तमकर्णिकारमंदारकुंदकरवीरसदंबुजार्च्य बिल्वोत्तमांगसुकदंबकचंपकादिदूर्वार्च्य शंकर विभो परिपाहि दीनं २४
हे विश्वनाथ मथितांतक मन्मथांग गौरीसनाथ मम नाथ सुरप्रमाथ मां रक्ष शंकर अनाथजनं प्रमाथं नाथाधुनाध्वनिकृतेवरमंथनाथ २५
हे विश्वाधिकविश्ववंद्यचरितास्ते पाप्मयेशप्रभो भो भर्ग त्रिपुरांधकांतक महाकामेश कामापह मत्कामं परिपूरयाशु भगवन्शंभो प्रसीदाधुना इसेवंपरिन

त्पतिप्रतिदिनं शंभोर्मुदे शांकरः २६ एवंस्तव्यमुमाधवं वरमानाथाक्षिपादांबुजं विश्वाधीश्वरमिंदुकुंदधवलं स्वार्धांगगौरीसखं हारः
शंकरमंबिकासहचरं देवंक्षयद्वीरकं पाराचारमहाघसागरमहासंसंतरेत्तत्क्षणात् २७ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेपंचदशोध्यायः १५
काश्यपउवाच येस्तुवंतिमहादेवं तेवैद्वाराः प्रकीर्तिताः येर्चयंतिमहादेवं तेवैशंभवसत्तमाः १ येध्यायंतिमहेशानचरणांबुजसत्तमं शंभोर्विहार
सदनामदनांतकरस्यच २ येवैक्षेत्रेषुनिरताः विरतान्यत्रवस्तुषु आनंदवनवासेनसर्वदानंदमेदुराः ३ शिवलिंगार्चकायेवै तेवैशंगाः प्रकीर्तिताः
येवैनैवेद्यभोक्तारस्तेवैभावाः प्रकीर्तिताः ४ येनामनिरताः शंभोः अन्यनामपराङ्मुखाः तेवैमाहेश्वराः प्रोक्ताः पात्रभूताघहारिणः ५ शिवभक्तार्च
कायेवै धनधान्यादिभिर्मुदा शांकरास्तेसदाज्ञेयाः हृष्टाः स्पष्टाः प्रसादिनः ६ येभस्मोद्धूलनरतास्तेवैशैवाः प्रकीर्तिताः अग्निरित्यादिभिर्मंत्रैः सर्व
दायेतिसुमुदा ७ दग्धपापास्तएवेतिविज्ञेयाः शांभवोत्तमाः त्रियायुषत्रिपुंड्रैश्चतथात्र्यंबककैरपि ८ त्रिपुंड्रधारिणः सर्वेतेरुद्रानात्रसंशयः
अघोरमंत्रतोयेवैसदारुद्राक्षधारिणः ९ कंठकर्णगलाद्यंगबाहुमस्तकके ष्वपि तेशांभवाः सदाज्ञेयाशिवस्यैवप्रसादिनः १० नैवेद्यंयेशिवे
दत्तं भुंजुर्वाशंकरार्पितं तेशांभवाः सदाज्ञेयाशिवस्यैवप्रसादिनः ११ येधारयंतिचिन्हानिदेवदेवस्यशूलिनः तेशांभवाः सदाज्ञेयाः शिवस्यै
वप्रसादिनः १२ येधारयंतिरुद्राक्षान्सदावैशांकरोत्तमाः तेशांभवा॰ येरुद्राध्यायजाप्येनजपंतिशिवतुष्टये तेशांभवा॰ १४ येरुद्रैश्चमकैर्नि
त्यमभिषेक्ष्यंतिशंकरं तेशां॰ १५ येवैपंचाक्षरासक्तास्तेनेशंपूजयंतियं तेशां॰ १६ येवैबिल्वार्चनप्रीतायेवैबिल्वार्चनप्रियाः तेशांभवामहादेव
प्रियानास्त्यत्रसंशयः १७ बिल्वपत्रार्चकायेवैत्रिकालंलिंगमस्तके तेशां॰ १८ येलिंगाराधनव्यग्राअग्रमुग्रार्चनेरताः तेशां॰ १९ येपंचगव्यैर्निय
तंत्रिकालमभिषेचकाः तेशां॰ २० फलजालरसैः शंभोरभिषेकरताः सदा तेशां॰ २१ पाटीरागरुकस्तूरीचंद्रचंदनलेपकाः तेशां॰ २२ शंभोर्लिंगेसदा
तुंगे असंगाः शंगतत्पराः तेशां॰ २१ बिल्वपत्रांबुजवरैः करवीरार्कचंपकैः मंदारपारिजातोत्थमालापुष्पप्रदाहिये २२ शंभोर्लिंगेविशेषणत्रिका
लंचप्रदोषके तेशां॰ २३ दिव्यवस्त्रप्रदातारोमहेशायसदामुदा तेशां॰ २४ येशंभोरत्नपुष्पादिप्रदातारोविशेषतः तेशां॰ २५ येतांबूलप्रदातारोअहर्नि

शमुमापतेः तेशांभ० ३० सुवर्णरत्नपुष्पाद्यैर्बिल्वपत्रार्चकाहिये तेशां० २६ येकृष्णागरुसाम्राणिगुग्गुलधूपदायिनः तेशां० २७ घृततैलमहादीप
दायिनःश्रीशिवालये तेशां० २८ येनैवेद्यप्रदात्तारोभक्ष्यभोज्यादिभिर्मुने तेशां० २९ येतांबूलप्रदात्तारोअहर्निशमुमापतेः तेशांभ० ३० येछत्रंदंडप्रदातारः
सर्वदाशिवमस्तके तेशां० ३१ येवैचामरदातारोहंसपांडुरमुत्तमं तेशां० ३२ येपताकप्रदातारःसर्वदायेशिवाग्रतः तेशां० ३३ येचादर्शप्रदातारोमहादेवा
ग्रतःसदा तेशां० ३४ येमृदंगमहावीणादुंदुभीवादनेरताः तेशां० ३५ तौर्यत्रिकादिकर्त्तारोनर्तस्त्रीणांप्रदायकाः तेशांभ० ३६ येशिवालयकर्त्तारःप्रा
कारवरगोपुरं तेशांभवामहादेवप्रियानात्यत्रसंशयः ३७ येशिवारामकर्त्तारःसर्वपुष्पोपशोभितं तेशां० ३८ येरथोत्सवकर्तारोवृषवाहनमुत्तमं
तेशां० ३९ येशांभवोन्नदात्तारोयतीनामपिभावतः तेशांभवा० ४० शांभवानांविशेषेणतेवैशांभवसत्तमाः येप्रदोषार्चनेरताःसर्वपूजाभरैःशिवे ते० ४१
येसोमवासरेसायंशिवलिंगार्चनेरताः तेशां० ४२ येसप्त्यामष्टमूर्तिंवैपूजयिष्यंतिभक्तितः तेशां० ४३ येभूतायांभूतनाथमर्चयंतिदृढव्रताः तेशां० ४४
येपर्वण्यपिचाभ्यर्च्येशर्वरीनाथधारिणं तेशां० ४५ येनामनिरताःशंभोःसर्वदारसनोज्वलाः तेशां० ४६ येभक्तार्चनतस्तुष्टासर्ववर्णेष्वपिध्रुवंम
हेशस्यविशेषेणशांभवाग्रेसराहिते ४७ येर्चयंतिमहादेवंत्रिवारंभस्मधारिणः तेशां० ४८ येक्षेत्रनिरताःशंभोविरताविषयेष्वपि तेशां० ४९ ये
थर्वणशिखाजप्यनिरतावेदपारगाः तेशां० ५० येरुद्राध्यायनिरताःसदापंचाक्षरादराः तेशां० ५१ एवंशांभवसत्तमाःशिवमहाचारानुरागादरा
दारोदारकुमारमारशरजव्यापारसंहारकाः पारावारविकारसंसृतिभरंतेनाप्नुवंतिध्रुवंहाराःशंकरपादपद्मनिरताविश्वेश्वरस्यार्चकाःपर
येशांभवाःशशिकलाशकलोत्तमांगलिंगोत्तमांगनवचंदनबिल्वपत्रैः संपूजयंतिकिलपापमत्तगभंगाःशांगाःस्तसंगहृदयाःशिवलिंगसंगाः
५२ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेषोडशोध्यायः १६ ॥ श्रीमुनिरुवाच भस्मत्रिपुंड्रपरिचिन्हितसर्वगात्रारुद्रत्रिनेत्रपदभावनस
र्वमित्राः विस्तपातकवरावरपंचवक्रास्तेशांभवाभुवनमाशुपवित्रयंति १ रुद्राक्षवक्षोरुमहच्छिरोगकंठोरुबाहुपरिचिन्हितसर्वगात्राःसु
त्रामवंदितपदावरसत्त्ववर्यपुण्याधिकाःकिलमहोन्नतशांकरास्ते २ पंचाक्षरासक्तहृदयाःसदयाःसदैवमोदायसर्वतनुषुप्रथितानमदायतेपि

वोधायसर्वजगतांतदुमासहायपादारविंदभजकायहितायतेपि रुद्राध्यायजपेषुसक्तहृदयाविश्वाकृतिध्यायिनःशंभोसर्वजगत्पतित्वगुणत्तोमंत्रा
र्थसारादराः येयौवनोन्नतमदेपिसदैवशंभुपादारविंदभजनायमुदाप्रवृत्ताः ४ मारोद्दाममविकारपूरितहृदोप्युज्झितत्तनस्तानकंहेयापायनिकायकाय
मपितेनप्राप्नुवंतिध्रुवं येशांगलिंगकृतसंगमहोत्तमांगगंगानरंगशशिरंगतुंगकृतांगभंगं मातंगवक्त्रवरतातमनंगभंगशंतांतरंगहृदयाःपरिशीलयंति
येविल्वमंदारसुचंपकाद्यैरिंदीवरैर्वरकदंवजकर्णिकारैः ६ माकंदकुंदजलसत्करवीरपुष्पैर्योभ्यभिनंदतिमुदासतुशांभवोहि यपाटीररसोरु
सन्मृगमदामोदप्रभाभावितंदेवैर्वंदितचंदनेनविलसत्सल्लेपलिंगंमुदा ७ यःकुर्यान्निशिवाप्रदोषसमयेसत्तालवृंतोद्भवैर्वातैर्वीज्यवसंतकेतक
भवैर्दुःखंनसप्राप्नुयात् शाल्यन्नंमधुराज्यसूपदधिजक्षीरादिमध्वादिभिःशाकापूपगुडाक्तभक्ष्यकसदागोधूमपूर्णोद्भवं ८ नैवेद्यंसुमनोहरंभुवि
सदाहृद्यंप्रदत्वाशिवेमाद्यंमोदकसंभवान्समधुरान्दत्वासमुक्तोभवेत् योधूपैस्तगरागरूद्भवमहासाम्राणिसद्गुग्गुलुचंद्रोघद्रवखंडसांद्रसुमहा
दीपैर्घृतार्क्कैःशिवे दद्याद्यःशशिशेखरेत्नममहालिंगालयेशांकरोभक्तोज्ञाननिदानसाधकवरोभूयात्सदैवाशुभे योनीराजयतिप्रदोषसमयेदीपाव
लीनांशतैःसाहस्रैरपिचंद्रशेखरमहालिंगंसमुक्तोभवेत् १० सच्छत्रैरखिलैर्महेंदुसदृशैःदद्याच्छिवायाशुवैसःशैवोभवतींदुचूडभजनात्सत्चामराद्य
र्पणैः पताकाभिःशंभुंविविधपटगर्भाभिरभितःप्रभामावोद्भावैर्मरुद्दरुणलीलाभिरपिवै ११ यस्तौतिशंभुंपरयाचभक्त्याप्रदक्षिणप्रक्रमणेनभक्त्या
लिंगालयेयःकुरुतेप्रदक्षिणंप्रणामपूर्वंसतुशैववर्यः १२ यस्तौतिशंभुंसकृदेवभक्त्याशंभोशिवेतिशशिधामधरेतिभक्त्या गंगाधरेतिप्रथितोरुद
क्षशिक्षाध्वराध्वक्षमहोक्षवाह १३ फालाक्षविश्वेश्वरशिक्षकमोक्षमार्गविज्ञानमीशानदेहीतिवक्तिसशैववर्यः यःशैववर्यतिलकोभवतींदुचूडपा
दारविंदभजनेननयेत्सकालं १४ नालभवोम्दवसुरोत्तमकालकालश्रीशूलपाणिचरणस्मरणप्रभावः अभ्यर्णमरणंचवीक्ष्यसभयोभावोहिभस्मासृष्ट
कृत्स्नर्णपूर्णमतिःसदैवसततंकिंचान्नपूर्णापतिं विश्वेशंसमुपास्यमुक्तिपरमानंदंलभेच्छांभवःयोगौरीरमणार्चनेनसरणिंमुक्तेर्विमार्गस्सहो १५ दू
र्वापामार्गनदलैःसुविल्वजदलैःसंपूजयेच्छांभवः किंदारान्नधनानिगोधनवरंवीराःकुमारापिवै विद्यावावरमंत्रयंत्रनिवहंकिंचौषधंरोगहृत् सर्वं

निवृत्तिमेतिजातुमरणेसर्वेत्रिनेत्रार्चनंएकंसाधकमित्यवैमिसततंकिंचांतकाद्भीतिहृत् आयातिमृत्युर्निकटेनचायुरायातियत्तद्गतमेवशंभो १६ पश्यामिशश्वन्निकटेसुदर्पदृष्टोरुतत्काननमंबिकेश तस्मात्प्रपद्येशरणंत्वदीयपद्मप्रभावाच्चरणंसदामे १७ शंभोयोनिमुखाच्चनिःसरणमप्युत्क्रांतिकालव्यथात्रुट्यन्मर्मतनुप्रकर्षजनितश्रांत्यामुमूर्षामयि तस्मिन्नस्तमितप्रपंचमिहिकामायारकोलाहलक्रंदद्बालकदेववंधुनिवहेचिंतैकथंतेपदे १८ मरणोत्तरमप्यतीवशोकंक्रकचाक्रामणघोरसौरिगेहं अनुभवशतकेपिपापतापैःनसुखंकिंचनवंचितोस्मिशंभो १९ योविल्वछदमालयाशिवमहालिंगोत्तमांगंदधत् प्रातःसंगवपुंगवोत्थवहंनपुण्येप्रदोषेपिच मातंगादितुरंगगोधनमहीदानान्नपानादिकंपुण्यंप्राप्यमुदासदैवउदयत्येषोहिभावोर्कवत् २० इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेसप्तदशोध्यायः १७॥ ॥काश्यपउवाच तस्मात्त्वांपतगश्रेष्ठविद्यायावीक्षयाम्यहं पंचाक्षरपरोयस्तुससर्ववलभाजनं १ भुक्तिमुक्त्योःस्वेपात्रंत्रिनेत्रप्रियकृत्तमः स्वतंत्रोपिमहादेवस्तन्मंत्रवशगोभवेत् २ पुण्यानुमित्रोभवतिसत्राशिपरिपूजितः यस्तुपंचाक्षरपरोपंचास्यध्यानपूर्वकं ३ सपंचत्वविहीनात्माभवेद्देवशिवःस्वयं पंचाक्षराश्रयाःसर्वेब्रह्मविष्णुमरुद्गणाः ४ पंचाक्षराश्रयाःसर्वेमुनयोयेतपोधनाः असुरायातुधानाश्चसिद्धविद्याधरादयः ५ गंधर्वाःकिंनरायक्षाःतथाकिंपुरुषादयः मंत्रेणानेनदेवेशंपूजयंतिविधानतः ६ लिंगेविल्वदलैर्नित्यैर्नीरैरपियथाविधि ममापिभवसारेणभक्तिरेवात्रकारणं ७ फलमाढ्यदरिद्राणांसममेवाडजेश्वर भक्त्याप्रसीदतिशिवोभक्त्यामुक्तिंप्रयच्छति ८ भक्त्यैवलभ्यतेज्ञानंवेदवेदांतवाक्यजं तत्वंब्रह्मेतिवाक्यानांभावनाभक्तिरेवच ९ मुक्तिप्रदंमहादेवंमत्वातिष्ठतिधीरधीः कथमन्येसुराःसर्वेमुक्तिदानक्षमाद्विज १० पशवःसर्ववेदाश्चसपतिःपरमेश्वरः सएवमोचकस्तेषांपशूनांपतिरीश्वरः ११ भक्त्यालिंगेर्चितोविल्वैःपाशेभ्योमोचयेत्पशून् मायापाशाःप्रकीर्त्यंतेकामक्रोधोरुलोभकाः १२ मदमात्सर्यमोहाद्याईषणादित्रयंतथा वर्णाश्रमौकुलंजातिधनाद्यखिलसंपदः १३ पुण्यपापादयश्चैवस्वर्गंचनरकंतथा देवतिर्यङ्नराकारज्ञानंतत्सौख्यविभ्रमं १४ संसारेसौख्यताज्ञानंविषयादिसुखभ्रमः विचाररहितंचेतोधारणंगुणिनांत्रयं १५ एतेपाशाःप्रकीर्त्यंतेपतिपूजाप्रभावतः शिवलिंगार्चनेनैवपाशेभ्योमुच्यते

रमः
१७

अग्निरित्यादिभिर्भस्मगृहीत्वाचनदेवहि परिमृज्यांडजेशस्यकश्यपः शांभवोत्तमः १७ दद्दौपंचाक्षरींविद्यांसर्वपापप्रणाशिनीं सतयाविद्यया
रेजेपक्षीशोपापवर्जितः १८ परमेश्वरपादाब्जंध्यायन्मंत्रंसमभ्यसन् मुक्तमेघइवादित्योविराजतियथातथा १९ पक्षीशोमंत्रमाहात्म्यात्तदा
रेजेमुदायुतः शिवलिंगार्चनविधिंउक्तवान्कश्यपस्तदा २० पूजाप्रभाववेत्तारंतंचक्रेत्वांडजेश्वरं कश्यपःप्राहतंपुत्रोमेवमभ्यर्चयेनित्यं २१ भ
स्मत्रिपुंड्रपरिवर्जितकालदेशाद्भूभारभूसुरवरोपिभासुरश्च आचारतोपिसुविचारितवेदभागसारोथितःशिवपदार्चनहीनवृत्तेः २२ रथ्यासुसर्वमल
दग्धविदिग्धभस्मगात्रैःसदाखरतरःखरएषवर्यः मूढःकामेषुविस्थोदृढतरभवजापारकारागृहीतःभ्रांतःपुत्रकलत्रमित्रनिवहैर्वधोद्यनैर्वंधुभिः
वुस्त्रोवुत्थतरोपिपाशनिकरैःसर्वेषणाभिश्चिरंईशानार्चनवर्जनाधममतिःशंभोःप्रसादोज्झितः २३ किंतूत्तमर्णमधमर्णगभीरनीरंघोरभ्रमार्णवमि
दंपरिपूर्णकाम त्तूर्णसदाभ्यर्णहृदंसदामांसंतारयस्वकरुणांतरकर्णधार २४ वर्णाश्रमश्रमभरैरतिजीर्णमीश दिव्यश्रीशिपिविष्टचारुचरणांभोज
प्रभाभावत्तोभावोजन्मपरंपरासुनभवेच्छ्रीशैवलिंगार्चकः मायाभावमवाप्यभावजनितोभावोभवानीपतिध्यानानंदसमुद्रमग्नहृदयोभेदप्रभावो
ज्झितः २५ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेअष्टादशोध्यायः १८ काश्यपउवाच कृतनित्यक्रियःप्रातःसमभ्युक्ष्याथवारिणा नदीतीरे
शिवागारेविल्वमूलेपिवाद्विज १ भस्माभ्यक्ततनुर्नित्यंत्रिपुंड्राणिचधारयन् अग्निरित्यादिभिर्मंत्रैःसर्वांगपरिपूज्यवै २ भस्मनापादपर्यंतंश्रोतेन
विरजेनच त्रियायुषैःत्रिपुंड्रंकोकुशासनउदङ्मुखः ३ प्राङ्मुखेवासदादेवेमुखेतत्पूर्वकेपिवा सद्योजातमुखेवापिधृतरुद्राक्षमालिकः ४ कंटक
र्णगलेष्वेववक्षोवाहुशिरस्सपि पंचाक्षरमिदंमंत्रंसतारंप्रजपेद्द्विज सहस्रंवातदर्धंवाशतमष्टोत्तरंतुवा उमासहायंदेवेशंध्यायन्नासाग्रलोचनः हृत्प
द्मसद्मगंदेवंत्रिनेत्रंचंद्रशेखरं सर्वाभरणसंयुक्तंफुल्लपंचमुखांवुजं ७ त्रिपुंड्रेणोज्वलत्फालंटंकपाशाहिशूलभृत् वृत्तवाहुचतुष्टोस्यप्रभामरणशो
भितं ८ सर्वांगसुंदरींदेवींचंद्रार्धमकुटोज्वलां नासाभरणशोभाढ्यांरत्नाभरणभासुरांतांटंकद्वयसंशोभिमहेंदुसदृशाननां महागंधजकस्तूरीपाटीरद्र
वलेपितां चंपकैर्मल्लिकाजाजीमालतीसरभूषितां तांवूलरागरक्तालंविंवाधरमनोहरां ११ हस्तपादाग्रसंशोभिकिंकिणीनूपुरोज्वलां फुल्लहल्लकह

स्ताग्रांहरवामांकगांसदा १२ पार्श्वद्वयेषडास्येनगजास्येनचशोभितां ध्यायेद्देवंमहादेवंसांबंचारुत्रिलोचनं १३ शुद्धस्फटिकसंकाशंनीलकंठंशिवंतथा
महामरकतोद्भभैसच्छायांचारुहासिनीं १४ एवंध्यात्वाचिरंदेवंलिंगेचावाह्यतंशिवं पाद्यार्घ्याचमनैःपुष्पगंधांबुपरिपूरितैः १५ पात्रैःपंचाक्षरान्न्यस्यामुद्रयादर्शि
तैस्तथा आवाह्यस्थाप्यपीठेतल्लिंगंस्फाटिकधातुजं बाणंवारससंभूतंचरंवास्थावरंतुवा पंचाक्षरेणतन्मौलौपुष्पंदद्याच्चभक्तितः १७ सकूर्चंपादमूलेतुनि
धायस्थापयेच्छिवं पाद्यार्घ्याचमनंदत्वामधुपर्कादिदापयेत् १८ क्षीराभिषेकःप्रथमंततोदधिघृतंमधू सिताचनारिकेलोदकदलीफलजालकं १९
फनसाम्ररसंचापिततोलिंकुचजंरसं इक्षुसारंचगंधोदरत्नस्वर्णाम्बुवंजलं २० अन्नाभिषेकंचततोनीरैरुद्राभिषेचनं पाद्याचमनदानंचततउद्वास्यपूजयेत् २१
पीठेलिंगेचसंस्थाप्यवस्त्रंयज्ञोपवीतकं भस्मनात्र्यंबकेणैवपूजयेदिंदुशेखरं २२ गंधाक्षतान्ततोदद्यात्स्वर्णाकल्पंयथारुचि निधनेत्यादिभिर्मंत्रैर्भवाद्यैर्वि
ल्वपत्रकैः २३ अन्यैर्वाविविधैःपुष्पैर्ग्राम्यारण्योद्भवैरपि तत्तत्कालभवैरेवपूजयित्वामहेश्वरं २४ धूपदीपंततोदत्वानैवेद्यंचापिदापयेत् तांबूलंचततोदद्या
ततोनीराजनंद्विज २५ छत्रंचचामरादर्शौततोतोयंत्रिकंक्रमं प्रदक्षिणानमस्कारंरुद्रसूक्तेनकारयेत् २६ ततस्तोत्रैश्चवेदोक्तैःपौराणैरपिशंकरं स्तोत्रेणानेन
पतगस्तुवीतेवंमहेश्वरं २७ काश्यपउवाच नमोनमस्तेशशिचूडगंगाधराव्ययामारगरादिधारिन् श्रीव्योमकेशायदयार्णवायसंसारवैद्यायनमोनमस्ते नमो
नमोदेवदयांबुधेहरमारांगसंहारककालशत्रो विश्वेश्वरापारदयानिधानपाहीशश्रीशंकररक्षमांसदा २९ भगाक्षिहरशंकरत्रिदशनाथपाह्यज्ञजप्रकाश
वरमौलिचक्रप्रमथनाथविघ्नाधिकृत् गजांतकसुमहाहवत्रिपुरघोरसंहारकप्रसीदत्वयथाधुनामधुहराक्षिपूज्यांघ्रिक ३० देवदेवनिगमांतवेद्यहृतापपाप
विनिवारकशंभो कालकालकरुणाकरशंभोपाहिमामखिलदुःखसमुद्रात् ३१ स्तुत्वैवंशिवमिष्टदानकरुणापांगंचलिंगस्थितंसंपूज्यप्रमथाधिनाथमगजा
कांतंसमुक्तिंलभेत् कामानप्यमितानवाप्यसमुदासुत्रासुखंशंकरोपुष्पैश्चापिप्रदोषपर्वणितथापापैर्विमुक्तोभवेत् ३२ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेए
कोनविंशोध्यायः १९ ॥ काश्यपउवाच सकाश्यपपिनेमश्चक्रेस्वपितुश्चरणांबुजं कद्रुद्रपूजासक्तस्यकश्यपस्यमहात्मनः १ तेनप्राप्तमहाविद्याप्रभावेणाद्य
नःसदा लब्धानुज्ञोथगुरुणावितत्पस्वप्रजावुभौ २ जगर्जेवलवान्नादंनदाहरहरेतिच उत्पपाताथगगनेतरुणारुणनाथवत् ३ मेरोर्मूर्ध्निसरोनाममानसाख्यं

तदांडजः समानससरःस्नानंचकारशुद्धात्मशुभः ४ मेरोरूपवनेतत्रबिल्वमंदारसंयुते चंपकाशोकसहितेमाकंदद्रुमसंयुते ५ पारिजातवनोद्देशेकंदमूल
फलावृते नानामृगांडजयुतेकेकिकोकिलनादिते ६ निधायतत्रलिंगंचपतगेश्वरनामकं अग्निरित्यादिभिर्मंत्रैर्भस्माभ्यक्तमहांगकः ७ धृतत्रिपुंड्र
रुद्राक्षःपंचाक्षरजपादरः रुद्रसूक्तजपासक्तःफलमूलैःशुभैस्तथा ८ समानसजलैःस्नाप्यप्रत्यहंपूजयन्छिवं बिल्वमंदारकुसुमैरसमैःकम
लोत्तमैः ९ निवेद्यफलमूलानिनिराहारोचरत्तपः वर्षंफलाशनःपश्चाद्वर्षंवायुजलाशनः १० एवंद्वादशवर्षाणितपसाविनतासुतः विनायकालकाल
स्यपूजयाहृज्जयेनच ११ तल्लिंगमध्यादीशानःतस्मैतस्मैप्रादुरभूच्छिवः गंगाचंद्रकलामौलिकपर्दविलसच्छिराः १२ उमयासहितोनित्यंनीलकंठ
स्त्रिलोचनः महावृषंसमारुह्यनंदिभृंगिगणावृतः १३ तंद्रष्टागरुडंतत्रमहापशुपतिःस्वयं तपसाकर्शितंतत्रप्राहदेवोवृषध्वजः १४ महादेवउवाच
नितरांपरिखिन्नोसितपसापतगेश्वर कस्तेकामंवदस्विप्रतंतेसंपूरयाम्यहं १५ सूतउवाच इतिशंभोर्वचःश्रुत्वाप्रणम्यांडजराट्शिवं भक्त्यास्तुप
लकोद्देवंमौलावंजलिमावहन् १६ तुष्टावशिपिविष्टंतंअष्टमूर्तिंकृपाकरं गरुडउवाच देवदेवसकलामरवंद्यविश्वनाथशशिचूडमहेश व्योम
केशजितकामकालहृत्शूलमूलकरदारितकाल १७ मारमारहरिसायकशंभोकालकंठकरुणाकरधीर घोरपातकभयादिविदूरपाहिमांवर
दयाघनसार १८ क्ष्मायष्टौरवीरंगरधरमुमाकांतमधुनाशरण्यंमौलीहृद्युतिविदितदिक्चक्रनमस्तं महांगेद्वच्चर्मांकृतपटसटाशोभिनंदहरिस्फु
रहस्योहारिप्रखरनखरोद्योतितसुखं १९ प्रपद्येदेवंत्वांश्रुतिवरशिरश्चारुपटलीवलीढंनेपादंसकलसुरमौलिद्युतिपदं अनाथानांनाथंस
कलजगतामेकशरणंशरण्यंत्वांशंभुंभवहरणपादंकलयतः २० यथाचेत्तोनित्यंनभजतितथाप्राकृतसुरान्हरिब्रह्मादिस्तान्सवरुणमरुत्वादि
कगुणान् भवंभावापन्नंश्रुतिवरशिरोवेद्यचरितंतवेशानंकस्तेप्रचरतिनरःस्तव्यमधुना २१ मदीयोयंमंतुःसहतुचभवानेवमनसायतोवेदेवे
द्योभवसिसहमानस्त्वमधुना तथाप्येतद्भक्त्यात्वयिगदितमेतद्व्रजतुमेवचः पथ्यंस्वास्थ्यंक्षमसिमयितिर्यक्कृतदयया २२ सूतउवाच गरुडोद्गीत
मेतद्दैस्तवंश्रुत्वाप्रहर्षितः उवाचवरदोसीतिवरंवृणुययामति २३ तवानयांडजस्तुत्यानितरांतुष्टमानसः ईश्वरउवाच मद्वरेणचतेकामोभवि

ष्यतिनचान्यथा इतिश्रुत्वावचःशंभोःप्रांजलिःप्राहचांडजः २४ गरुडउवाच प्रज्ञांबलंचविजयममृताहरणायमे मातुर्दास्यविमोक्षंचसर्पकोटि
स्तजंहिमे २५ तवप्रसादतःशंभोभविष्यत्यद्यमाचिरं मेरुमूर्ध्निमहादेवमत्कृतेपतगेश्वर २६ अस्मिन्सन्निहितोलिंगेभवत्वंसर्वदाशिव इतितद्व
चसासर्वंतथास्त्वितिसवरदस्थरः २७ ववृषुःकुसुमासारंदेवामूर्ध्न्यंडजेशिनः प्रवादयंस्तेवाद्यानिननृतुस्तावराप्सराः २८ रंभोर्वशीमेनकाद्यामहेश
सेवसन्निधौ स्कंदउवाच ततःपतगराडूतदापुरहरांघ्रिसंपूजनाद्बभूवबलगर्वितःफणिवरोरुमालाधरः विनत्यनिजपक्षतिक्षपितवातपोता
हतिप्रकीर्णवरशैलहृत्सुरफणींद्रवित्रासनः २९ हरोपिविजहारवैगिरिजयासमालिंगितोमरुद्गणगणावृतोफणिगणोरुमालागणः कृतोडुग
णपोल्लसद्दृशिखंडकोटिप्रभाविराजितकपर्दकोवृषवराधिरूढोययौ ३० इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेगरुडस्यईश्वरप्रसादोनामविं
शोध्यायः २० स्कंदउवाच तरुणःकरुणामूर्तेःकृपयाअरुणानुजः वरुणालयगतान्सर्पानुज्जहारमहेंद्रहा योध्वंययौदेवलोकंपक्षावुत्क्षि
प्यवेगतः अट्टहासेनघोरेणकंपयन्नमरावतीं २ ततोदेवाभयापन्नाःसर्वेचापिसकिंकराः विद्याधराश्चगंधर्वाःसुपर्वाणोमहौजसः ३ किमेत
दितिमन्वानाःसमुत्तस्थुरुदायुधाः अमृतंपात्रनिक्षिप्तंयुक्तमुत्तमधन्विभिः ४ देवैःकिंनरगंधर्वैःसुरैर्गोरंडजेश्वरः प्रचंडचंडुदंडेनपक्षकांडेन
भूयसा ५ मार्तंडसारथेर्भ्राताखंडयंश्चंडविक्रमः कांश्चित्पक्षप्रतारेणदेवान्संमूर्छितांस्तदा ६ कांश्चिद्द्रवद्रक्तधारान्कांश्चिद्गंधर्वसत्तमान्
ताडयामासपादेनगरुडोमृदुभावतः ७ उज्जहारैवबलवान्अतुलामलविक्रमः कलशंपूर्णमादायअमृतस्यतदांडजः ८ उज्जहारामृतं
मध्यांनमध्यंदिनकरोयथा समातुर्निकटंगत्वानत्वादत्वामृतंतदा ९ मानरंमोचयामासदास्यभावात्स्वभावतः कद्रुपुत्रांस्तदायुध्येयोधयामास
वैखगःआशीविषांस्तदासर्पान्निर्वीर्यानकरोत्तदा तत्फणामणिमालाभिःशोभितःपतगेश्वरः ११ द्रावयामासतान्सर्पान्काद्रवेयांस्तदाखगःतां
मातरंसुपर्णींचसांत्वयन्नतिवेगतः १२ मेरोर्मूर्ध्नितदागत्वाप्रत्यहंवैतदांडजः पतगेश्वरमभ्यर्च्यबिल्वपत्रैश्चपंकजैः १३ समायातिगृहंमातुः
भक्तोनित्यंमहेशितुः तदामृतंगतंदृष्ट्वादेवाःसर्वेसवासवाः १४ गंधर्वाःकिंनरायक्षाविद्याधरमहोरगाः बलप्रमथनार्चितोबलवंतंचपक्षि

णं मेनिरेविस्मयोपेताः विष्णुंगत्वातदाब्रुवन् उदंतंतत्कृतंसर्वेदेवास्तत्रसवासवाः १६ देवाऊचुः श्रुणुविष्णोभयंप्राप्तंदेवानांगरुडात्सदा अमृतंय
त्सुरादत्तंसमुद्रमथनोद्भवं १७ पीतावशेषंदेवेश्वरक्षितंतद्गृहेसदा तदुज्जहारवलवान्नमरारिःसपक्षिराट् १८ अमुंचन्मातरंस्वस्यदास्यभावादपिध्रुवं
कश्यपस्योपदेशेनशिवपूजाप्रभावतः हिनस्तिदेवान्गंधर्वान्काद्रवेयानपिद्विजः हीनामृतान्हरेदेवानुन्मृतानित्युपधारयनिश्रीकंविरूपंसर्वंकष्टमंध
समावृतं नभ्राजतेयथापूर्वंतस्योपायंवदस्वनः २१ इत्युक्तोमरपुंगवैःसचहरिःविस्मायितेनांतरा देवानाहतदाभयेनभगवन्भक्तरत्नंततंनदा ओजस्ते
जयुतंशिवार्चनेनमहाप्राभामजातंप्रभुंजेतारंत्वपराजितंरणगणेमेनेतदोवेहरिः २२ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेएकविंशोध्यायः २१॥ स्कंदउवाच
ततोविष्णुःसुरानाहभीतान्वैगरुडात्तदा मनसाचिंतयन्नर्थंजयेतस्यच्छनव्रतः १ श्रीविष्णुरुवाच श्रुणुध्वममराःसर्वेजयंमेद्यगरुत्मतः सनशक्योवलेर्जेतुं
सर्वैरपिसुरासुरैः २ मयाचब्रह्मणाचैवकश्यपस्यात्मजोयुवा किंचशर्वार्चनवलादखर्वंगर्वमाश्रितः ३ सतेनपीडयत्येवजगत्सासुरमानुषं आशीविषा
नपिसुदानिर्विषानकरोद्बली ४ सवलीशंभुभक्तश्चभस्मरुद्राक्षधृक्सदा पतगेश्वरसभ्यर्च्यमेरुमौलोकृताश्रमः ५ श्रमहीनःसदाशंभोःपादसंश्रयतः
खगः क्षयद्वीरपदार्चातोवीरसूर्यःखगेश्वरः ६ वलीयुवाचपक्षीचत्र्यक्षपादार्चनेरतः वालिनोविजयेप्राप्तेसांत्वेनैवचवशंनयेत् ७ साम्नैवाभिप्रसन्न
स्सर्वंभवतिहृद्गतं शांभवेषुनमेधार्ष्ट्यमुपायोवापिविक्रमः ८ शिवभक्तामहाघोरपराक्रमयुताःसदा अघोरपादसंसक्ताअसुराभूसुरास्तदा ९
पुरादक्षाध्वरेसर्वेवीरभद्रेणशिक्षिताः अहंदेवेश्वरस्त्वंचभगाद्यादेवतागणाः १० सागरोद्भवतोघोराद्गराद्दग्धोस्मिदेवताः करुणाकरदेवेनतारितागर
भक्षणात् ११ मत्स्यकूर्मवराहंचनारसिंहतनुंहरः शिक्षयामासमेपूर्वंकंदर्पोदर्पसर्पहा १२ यस्यभक्तैर्द्विजैश्चाहंसर्वदापिनिराकृतः शापितोहंचभृ
गुणामानुषीयोनिमास्थितः १३ रावणेनरणेपूर्वंनिर्विण्णोस्मितदासुराः दशजन्मस्वपितदाअसुरैःपीडितोस्म्यहं १४ यदायदामांगर्वोढंदहत्यादेवः
पिनाकधृक् भवतश्चतदाहृष्टान्दहत्यैवसमहेश्वरः १५ उत्पाद्यैवासुरश्रेष्ठान्स्मरजंभादिवृत्रकान् नमुचिप्रमुखांश्चापितथान्यांश्चयुगेयुगे १६
हिरण्याक्षादिभिर्युद्धेअस्मान्मोहयतीश्वरः तांश्चहृष्टानथज्ञात्वाअस्माभिर्विनिहंतितान् १७ अस्माभिरपियेशक्यानयुद्धेहत्यसोस्वयं त्रिपुरांध
ककामादिकालकालःकृपानिधिः १९ दधीचिनापिमुनिनानिर्जितोस्मिरणाजिरे क्षुपस्यपक्षपातेनएवमादिमयाद्भुतं १९ भवोद्भवस्यचरितं
दृष्टंपूर्वंसुरासुराः तस्मात्खगेश्वरजयेनप्रसाद्यजयोभवेत् २० इत्युक्त्वाससुरैःसार्धंययौयत्रखगेश्वरः मेरुमूर्ध्निकृतावासंअंडजंप्राहमाधवः २१
विष्णुरुवाच धन्योसिकृतकृत्योसिमान्योसिपतगेश्वर नत्वयासदृशंभूतंलोकेदृष्टंमयासुरैः २२ शिपिविष्टपदार्चातःसर्वेषांकष्टनाशकः सुसंतु
ष्टःसुनिष्ठावान्ज्येष्ठलिंगार्चनात्सदा २३ वलप्रमथनार्चातोवलवांस्त्वंखगेश्वर क्षयद्वीरपदार्चातोवीरोसिअंडजसत्तम २४ कस्तेप्रभावंचगुणांश्च

क्रोवक्तुंसुरेष्वपि अशक्ताएवसर्वेपितुल्यःशक्तिधरेणहि २५ मत्तोवृणुष्वकामंतेनदेयेवमपूरये सूतउवाच इतिविष्णुवचःश्रुत्वाप्रहस्यगरुडोवदत् मृ
डार्चनरतोविष्णुइंद्रादीनपितत्रवै २६ गरुडउवाच सर्वज्ञानामितेचित्रंसुराणांकार्यसाधक अस्मार्चनप्रभावेनत्वयाचक्रमिदंहरे २७ लब्धंतेनैवविजयोभ
विष्यतिसुरेष्वपि वैकुंठमपिसंप्राप्तंतदाशर्वपदाश्रयात् २८ देवानहंसदाजानेकांदिशीकान्हिमत्सुरः पुरादक्षमखेयूयंवीरभद्रेणशिक्षिताः २९ अस्थानस्थै
जसःसर्वेशिवद्रोहेणवैतदा गरज्वालावलीदग्धतनुस्त्वमासिकाष्ठवत् ३० त्वंकथंवरदोमेद्यकिंन्यूनंममवैहरे शिवार्चकस्यमेकिंचित्त्वत्तोप्यद्यनदुर्लभं ३१
अहंदासस्त्वंणुवरंयथेष्टंवरयाधुना अचलातुलराजकन्यकाकुचलीलाललितोरुचारुवक्षं श्रुतिलोलाक्षवराक्षमालभूषंविषमाक्षंभजतिप्रदोषकाले ३२
यःकालांतकपूजनेनदिवसंनिन्येसकलातिगोभूयान्नैवभवेषुसंसृतिभरेघ्राकंठलग्नोप्यसौ दुःखेषुप्रसभंहिमज्जतिनवैकिंदुष्कृतैःशांकरः भद्राण्येव
लभेतशंकरकृपापीयूषधारारसैः ३३ शतपथयजुषामथोर्ध्वगम्यंयच्छ्रुतिसारंजपतामथप्रदोषे प्रमथपतिपदाब्जलोलचित्तोभ्रमतेनैवभवेभवेषुसक्तः ३४
इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेद्वाविंशोध्यायः २२ सूतउवाच इत्युक्तंतद्वचःश्रुत्वातमाहसुरसत्तमैः विष्णुस्तदांडजश्रेष्ठंकाश्यपिंमेरुमूर्धनि १ विष्णुरु०
यदिदेयोवरोमह्यंसत्यमद्यखगेश्वर मातुर्दास्यापहरणेपत्नीतममृतंत्वया २ तदद्यदेहिदेवानाममृतास्तेनवैसुरा हीनामृताःसुराःसर्वेमृतानिसुपधारय ३
साहाय्यमासुरेयुद्धेवाहनत्वेनमेकुरु वरद्वयंमेदेह्यद्यसत्यसंधोभवान्खग ४ सत्येप्रतिष्ठितालोकाऋतंसत्यंमहेश्वरः सत्येनादित्यावल्लिनःसत्येन
धयतेमही ५ नक्षत्राणामथोपस्थेसोमःसत्येनआहितः इत्येषावल्कचःप्रोक्ताश्रुतिरेषासनातनी ६ तस्मात्सत्यपरोभूयाःपतगेशस्यसन्निधौ त
दाविष्णुवचःश्रुत्वाप्राहांडजकुलोद्भवः ७ शर्वपादार्चनरतोगर्वपर्वतमध्यगः पतगउवाच सत्येस्थितोहमेवाद्यसत्यभूताःशिवाश्रयाः आत्तपादे
वदेवस्ययूयंसर्वेसुरासुराः ८ उदेतिसवितानित्यंवायुर्वातिशिवाज्ञया चंद्रोपिभगणैःसार्धंभ्रमंतेहनिशंग्रहाः ९ शेषोशेषैःशिरोरत्नैःविभर्तिपृथिवीम
पि सागरोगरकंठस्यशासनान्नोर्ध्वगोभवेत् १० मुनयोमनवश्चैवअनलोवहतेहविः लोकालोकास्तथासर्वेविष्णोसत्येवप्रतिष्ठिताः ११ ददाम्य
द्यवरंतेद्ययथासंप्रार्थितंत्वया सुराणांसन्निधौविष्णोकिंपुनःशिवसन्निधौ १२ यःशंभोःसन्निधौसत्यंकृत्वानैवप्रपालयेत् सपातिनरकंघोरं
दारुणंदेहसंक्षयेतस्माद्वश्यंकर्तास्मिदास्यमृतमेवते सुराणांदुःखजनकंनमेकार्यंहरेसदा १४ मातुर्दास्यापहरणेसमानीतंमयाधुना किंचैकंवच्मिते
विष्णोसुराणामुपशृण्वतां १५ सन्निधौपतगेशस्यसत्यंवदहरेधुना यदाभस्मादिदिग्धांगोत्रिपुंड्रोज्वलचिन्हवान् १६ रुद्राक्षमालाभरणःयत्रयुद्धोगमि
ष्यति लिंगार्चकोसिनिर्पतंविल्वपत्रैरखंडितैः १७ शिवनैवेद्यभोक्तात्वंसदाशर्वपदाश्रयः सुरैरप्यहंशेयुद्धेकोयदाविष्णोगमिष्यसि १८ तदात्तेविजयोवि
ष्णोर्भविष्यतिशिवार्चनात् शिवचिन्हांकितःशत्रूनजेष्यस्येवनसंशयः १९ भस्मरुद्राक्षहीनांगानपरान्जोहनिष्यति तदावहामिस्कंधेननान्यथाममम

भाषितं २० किंचजात्वमसिभगवानत्यंतभस्मासकः पुरा संशिक्षितोसियत्केनतेनदेवैः पराजितः २१ वीरभद्रेणहिपुरातस्मात्सत्वंवदाधुना स्कंदउवाच
इत्युक्तोगरुडेनशंकरपदध्यानानुरक्तेणहिविष्णुर्वीक्ष्यमिदंजगाद्रभसाहर्षाश्रुधाराश्रुतः देवानामुपशृण्वतांशिवपुरोदृष्ट्वांडजेशंतदाप्राप्यात्रा
मृतमुत्तमंसुरकरेदत्वातिसंतोषतः २२ श्रीविष्णुरुवाच यः शंभवेनभवनाजिघुसर्वदापिसाहाय्यभूतबलिनाविजयोहिमेद्य कांक्षेस्मताद्यहृदयेखलुस
मिस्वमेनत्वयोक्तमधुनाप्रकरोमिपक्षिन् २३ इत्युक्त्वासजगामदेवसहितोभक्तिचवीक्ष्यांडजेसंतुष्टापिखगोपिविष्णुमवहद्दैत्याजिमध्येस्वयं रुद्राक्षाम
लभस्मसंगतमुमाकांतार्चकं नंदहरिंपद्माक्षामलपूजितोत्तमहरेनिष्ठावतोचेतसा २४ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेविष्णुगरुडप्रसादोनामत्रयो
विंशोध्यायः २३ स्कंदउवाच गरुडोपद्रुताः सर्पाः काद्रवेयामहाबलाः नखतुंडविनिर्भिण्णाः गरुडेनहतौजसः १ पक्षविक्षिप्तघूर्णाश्चासंश्चसुश्रव
सांवराः शेषानंतोवासुकिश्चकार्कोटकधनंजयौ २ गुलिकः शंखपालश्च धृतराष्ट्रः पिलिप्पिलः कंबलाश्वतरौबभ्रुः तुहुंडोबलवध्रकः ३ पनसोवारा
णोरैभ्योतक्षकोभद्रकर्णकः पवनाशोणिमांडश्चागगौथवसुशेणकः उद्दावसुः गृध्रहनुः जातुकर्णोअयः शिराः कपोतरोमास्तथाश्चित्रचंद्रोविदार
णः ५ इत्येतेनागराजानः कद्रुतनुसमुद्भवाः मात्रासहैवतेसर्वेदुःखितागरुडार्दिताः ६ काश्यपंप्रणिपत्योचुः सर्पादर्पविवर्जिताः जक्रुसंतः श्वासभारेः दुः
खशोकाकुलांतराः ७ नागाऊचुः प्रणताः स्ममुनिश्रेष्ठभार्यायाश्चकनीयसीं आयसीप्रतिमेवासीदुःखशोकजरातुरा ८ गरुडेनहतासुत्राक्रोशंतीत्वां
समागता तस्मात्क्षमापराधंनः पुत्रवात्सल्यतोमुने ९ यत्कौटिल्यंपुरामात्रायदस्माभिः कृतंतदा तत्पापफलभोक्तारस्तत्ताकाशमिहागताः १० सायक
द्रूर्मुनेः पादौनत्वाथव्रीडितातदा प्राहभर्तारमीसंतीनिश्वसंतीचपन्नगी ११ सन्नगीरतिदृष्ट्वापिदृष्टाकौटिल्यवर्जिता कद्रुउवाच सापत्न्यात्क्रोधतोभर्तः पु
त्रवात्सल्यमोहिता गरुडेनहताः सर्पाः मत्कौटिल्याग्निधर्षिताः १२ हतशिष्टान्गूढपादान्गरुडाद्रक्षमेसुतान् दृढंमूढपदध्यानात्त्वंचगूढतपोधिकः १३
मूढांगूढपदांविप्रमातरंक्रोधिवर्जितां सूतउवाच इतितस्यवचः श्रुत्वाकश्यपः प्राहतांतदा सांत्वयन्समुनिश्रेष्ठस्तदातांसर्पमातरं १४ काश्यपउवाच
मेवंवदविशालाक्षिकाचिंतामयिसंस्थिते जीवयिष्येसुतान्तेद्यगरुडेनहतान्पुनः १५ माकौटिल्यंकुरुष्वाद्यसपत्नींप्रतियादृशं येच्छद्मकुर्वतेमूढाः तेः पश्चा
त्तप्यतेभृशं १६ तत्पापफलतस्तेद्यपुत्रानष्टाहतौजसः इतितांसांत्वयन्वाक्यैर्मृतानुज्जीवयन्मुनिः १७ शिवार्चनप्रभावेनपन्नजातसुतोत्तमः तानाहूय
सुतान्कद्रोः प्राहार्थवदिदंवचः १८ कश्यपउवाच ईशमाराध्यकेदारेस्वसुतैः सहसुव्रते ईश्वरस्यप्रसादेनकेदारस्यार्चनेनच १९ महेशाज्ञावशाकद्रुस्व
सुतैः सहसंवस पातालेहाटकेशाख्यलिंगंसंपूजयस्वशुभे २० पुत्रैराराधयेशानंतेनत्वंसौख्यभागिनी भोगिभिर्भोगनिलयंपातालंसर्वसौख्यदं २१ त्रिवि
ष्टपादपिसदाशिपिविष्टाश्रयात्तदा तल्लिंगमहिमानंतेसमासात्प्रब्रवीम्यहं २२ गंगाजटाजूटमौलेरिंदुशूलभृतोद्यमे हाटकेशाख्यलिंगस्यमहिमांमेशृणुध्रुवं २३

काश्यपउवाच तल्लिंगप्रभयासुदीपितमहत्पातालल्लोकंसदानागानांविलसत्फणामणिगणज्योत्स्नोरुधारान्तनाः नोचंद्रार्कसुविद्युदुज्वलमहावन्हिप्रभा
भाधिकाः नोषानोभगणासदैवनदिवारात्रेमहेशाश्रयात् २४ वंदारुवृंदगणपाअपिचंद्रमौलिपादारविंदभजनाप्तमुदाप्रयांति नागैर्नगोपममहोरुश
रीरशीर्षैः नागारिवाहसहिताःपरिपूजयंति २५ तत्पातालतलेपिहाटकमहालिंगंसदैवार्चयन् नागैर्नागवराःस्वकीयसुमहाशुंडोरुकांडोत्थितैः धारा
सारसुपुष्करोत्थतलसहित्वीदलैःकोमलैःतत्राष्टौनिवसंतिभूधरवराःकैलाससानुप्रभाः २६ पातालेत्तालकेतुप्रभृतिवलिवराःशक्रवित्रासनायेदेवा
अप्यमरावतींपरिविहायात्रैवसंमोहिताः विप्रेंद्राःसुरसिस्थदैत्यनिकरायूयंचनागोत्तमाःशांगंलिंगमुमापतेःप्रियतमंश्रीहाटकेशाभिधं २७ कष्टंवीक्ष्यत्रिवि
ष्टपंश्रुतिशिरोनिष्ठांहिसंप्राप्यनेधन्यास्तेशिपिविष्टहृष्टमनसासंपूज्यपत्पादरान् जूटाहिद्युतिकोटिकूटघटनोत्तुंगोत्तमांगोल्लसच्चंद्रांशुस्फुटदुत्पलारुणर
जःस्वःसिंधुमौलिंहरं २८ लीलापांगस्फुलिंगसंगतमहानंगांगमातंगहत्तल्लिंगोत्तममध्यसंगतमुमादेहार्धलिंगंहरं वालेंदुद्युतिजूटिनाखिलजयाको
टीरकंघोर्यवेदवचूटितार्धविलसद्भात्रेनिटालेक्षणं २९ पाटीरागरुचंद्रचंदनवैरालिप्यकाकोदराःस्वैर्दारैरतिसुंदरैःसुमनसांभारैश्चनत्थाटकंलिंगं
तत्परिपूजयंतुनियताःवीरैःकुमारैर्युताः ३० इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेपातालेहाटकेशप्रभावेचतुर्विंशोध्यायः २४ काश्यपउवाच उपाय
मेकंवक्ष्यामिपुत्रैःसाकंशृणुष्वमे यस्याराधनमात्रेणसर्पास्तेसुखिनःसुताः जरामरणनिर्मुक्तागरुडाद्भवभीतितः मुक्तास्तेपन्नगश्रेष्ठेपन्नगानिवसंतुते २
मौलौहिमवतःसुभ्रुनानामुनिवरतस्यैवे निवसंतुसदाहृष्टाःशिपिविष्टार्चनेरताः ३ वरकाकोदराःसर्वेकेदारेशसमर्चकाः कुमारदारसहितामारमारार्चनेरताः४
असारसंसारमिदंतरंतुचसुनिर्भयाः सापत्न्यदुःखसंतप्तोगरुडोवलवत्तरः ५ दृढंमृडार्चनरतोस्त्वमोढ्यपरिवर्जितः अमृतंयोहरत्पूर्वंसुरान्विद्राव्यनिर्भ
यः ६ हरिणाप्रार्थितोदेवैःवाहनत्वंडजेश्वरः प्रादाद्वरंसहरयेवहामीतिसुतोमम ७ अशांकरंहरिंदृष्ट्वापानपत्संवुधोहरिं स्वस्कंधतोद्यगरुडोमृडपादा
र्चनेरतः ८ हनिष्यत्येवतेपुत्रान्सोपिपुत्रोममाधुना पतत्रिनाथोवलवान्त्रिनेत्रपदपूजया ९ उभयोःसंधिकरणंजातिवैरान्नवैभवेत् तस्मात्सर्पाम
हादेवंकंदर्पोद्दर्पगर्वहं १० व्रजंतुशरणंसांवंशरण्यमभयप्रदं आराध्यदेवदेवेशंकेदारेसंवसाधुना ११ शिवचिन्हांकितात्वंचभवसुभ्रुसुतैःसह भस्मरुद्राक्षसं
पन्नाशिवलिंगार्चनेरता १२ त्रिपुंड्रधारिणःसर्वेसर्पाःपंचाक्षरादराः रुद्राध्यायानुवृत्त्यैवकाद्रवेयावसंत्वपि १३ केदारेशार्चनेनैवसिध्यंत्येवमनोरथाःसु
रासुराश्चमुनयःपूर्वंकेदारपूजया १४ वभूवुर्वलिनःसर्वेतस्मात्त्वंशरणंव्रज पुत्रैःसाकंव्रजसुखंशिवार्चनरताभव १५ शांभवंत्वांछनंदृष्ट्वागरु
डोनहनिष्यति येशांभवद्रोहकृतस्तेवैनिरयगामिनः १५ तस्मात्पन्नगारूसर्पान्नवैहिंसात्सुखंव्रज शिवोपिनेप्रसन्नस्यात्केदारेशस्यपूजया १६ पुत्रा
णांतववदेवोपित्राणंभक्त्याकरिष्यति त्रिपुंड्रमौलयःसर्वेकुंडलीशाभवंत्वपि १७ रुद्राक्षभूषणाःसर्वेतेचक्षुःश्रवसांवराः भवंतुभवपादार्चाभावैःकुर्वंतुनान्यथा

१८ पापकंचुकनिर्मुक्ताः त्यक्ताः स्वैः कंचुकैः सह कद्रुंचपतिपूजानोवंचनावर्जिताः सदा १९ रुद्राक्षधारणाच्चापि तथा पंचाक्षरीजपात् भस्मत्रिपुं
ड्रकरणात् भवः प्रीतो भविष्यति २० रुद्राध्यायजपेनैव तथा विल्वार्चनेन च केदारवासाच्च सदाकाकोदरसुखप्रदः २१ प्रदिशत्येव देवेशः सर्पाणां स्था
नमुत्तमं सर्पाणां प्रीतितः शंभुः स्वांगभूषां करिष्यति २२ न केदारसमं लिंगं भव्यं हि जगतां त्रये प्रसादजनकं साक्षात्पूजितं भक्तिमुक्तिदं मया पद्मास
नात्त्वात्वा पूजितं सर्वकामदं तत्पूजितात्स्थिरैषा मत्तो जाना सुरासुरैः २४ तस्मात्पूजय यत्नेन कद्रुत्वं स्वसुतैः सह काश्यप उवाच अंभोजसंभवभवा
मनवः सुराश्च कुंभोद्भवादिमुनयो दितिनंदनाये अंभोधितल्पकगतो हरिरेत देवलिंगं सदंबुजवरैः परिपूज्य विल्वैः २५ तुष्टोप्यशेषसुविशेषमहा
हिशेषभूषाविशेषभसितोत्तमपूषकोटिसंकाशलिंगमधुना परिपूजयस्व सूत उवाच इत्युक्तं मुनिवचनं निशम्य कद्रुः कद्रुद्रार्चनसाधनाय पुत्रयुक्ता
केदारं मुदितमनाययो नदानीं न त्वां तं मुनिवरमीशपादभक्तं २७ सर्पास्तेपि त्वतो निशम्य वाक्यं भस्माक्षादिविभूषिताः सहैव मात्रा निर्जग्मुः हिमशिखरा
श्रयं तदानीं क्षेत्रं तत्त्रिदशपतेर्महेशितुः प्रियं वै २८ कुमुदांबुजमित्रवन्हिनेत्रप्रियलिंगार्चनतो रगाः कृतार्थाः श्रुतिशेषविशेषदर्शनेमतिरीशानपदार्चनाभ
वेत् २९ उरगा अप्युरगायभक्तिनिष्ठाः तुरगारातिवहांतकाब्जपादे सुरमारहरामरेंद्रवंद्ये करिवीरेंद्रकठित्वचोरुवासे ३० अरुणानुजभीतितो वि
हीनाः वरतक्षकवासुकिद्विजिह्वाः शरणारुणपादपद्मयुग्मं भजतां नास्ति भयं कदाचिदेव ३१ वरुणालयपारणाज्ञया शंभुं करुणासागरमीश्वरार्चनेन
मरणादपतत्पभीतिजातं स्मरणेन शितुरेव कारणेनहाराः ३२ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे केदारगमनं नाम पंचविंशोध्यायः २५ स्कंद उवाच
केदारेशं समाराध्य काकोदरवरास्तदा भस्मरुद्राक्षसंपन्नाः पंचाक्षरपरायणाः १ रुद्राध्यायेनाभिषिच्य विल्वैः संपूज्य भक्तितः स्वफणामणिमाणिक्यैः
संपूज्य परमेश्वरं २ नैवेद्यैर्धूपदीपैश्च तथा नीराजनैरपि तुष्टुवुस्तेपि भुजगाः भुजंगाभरणं शिवं ३ नागा ऊचुः पाद्मजमित्रनयनामलभूतिगात्र
रुद्र त्रिनेत्र गिरिराजसुताकलत्र पात्रे विचित्रतरमेतदहो पवित्रं सत्रातिरात्रमखतर्पितलोकयात्र ४ श्रीओमकेशसकलेशसकलेशमहेश संभो को
शावकाशशिशेखर शंकरेश देवेशखंडपरशो पशुपाशनाशपाहीश मामकधियातवपादभक्तान् ५ त्वं भर्गसर्गकरणामयदीनवर्गसंतारकार्गलपदान्
परिमोचयाशु दूर्वादलार्चितपद त्रिदशोरुगर्वनिर्वापणार्णववसांबुजमित्रनेत्र ६ श्रीमन्मेरुशरासनत्रिभुवनाध्यक्षाध्वराध्यक्ष वीक्षत्वत्करुणा
कयाक्षलहरीसंहारिनाघोघकान् उक्षाधीश्वरकेतनेश्वरदयापात्रान्त्रिनेत्राधुनाकल्याणांचपतेसुदक्षमखहृत्तूर्णंप्रसादं कुरु ७ भूभृद्राजकुमारी
काकुचतटीपाटीरपंकांकितं रुद्राक्षप्रियभस्मपुंड्रानिटिलज्वालोरुगंगाधरं वैय्याघ्रत्वगलंकृतांगमसकृत्सप्रेमचित्ते सदाविन्तशादिपदप्रदं हरिशं

संभावयामोहरं ८ विश्वेशस्यपदांबुजाश्रयणतोनिश्रेयसोरेकभाक्भोगानप्यमितानवाप्यभुवनेकैलासमौलौगणः भूयादप्रजकल्पकोटिषुचिरं
भोगिप्रियाभोगघटकृचंद्रोत्तंसकिरीटकोटिविलसत्कंदर्पदर्पापहः सूतउवाच नागानांचस्तवंश्रुत्वाकेदारेशोमहेश्वरः तल्लिंगमध्याच्चतदाआविरा
सीत्स्वयंहरः १० नागजिनोत्तरासंगोशशांककृतशेखरः उमयासहितोदेवोनीलकंठस्त्रिलोचनः ११ गंगाधरःकपालांकःशूलज्वलनसत्करः
तंदृष्ट्वादेवदेवेशंसर्पाःकद्रुसमन्विताः प्रणम्यचमहादेवंसंस्तुवन्नीललोहितं नागाऊचुः वेदार्चशर्वयमगर्वहराद्यसर्वकंदर्पदर्पहरसर्पमहोरुहार
अघोरोग्रभीमभवभर्गसुसर्गवर्गस्वर्गापवर्गदविभोनवभक्तिमार्गे दूर्वादलार्चनकृतंभवदीयलिंगेसंगेपिशंगनिवहाः किमुतापसार्गैः विल्वैश्चपंकज
वरैःकनकैःकरवैः पूर्णेंदुचूडकुलभूधरवासशंभो १४ विश्वामहेश्वरहरामरधीरवीरगौरीमनोहरहराव्ययमारमार संसारभारपरिहारकरप्रसीदश्री
शंकरावगरधुर्यधरप्रसीद १५ सूतउवाच तत्स्तुत्यातोषितःशंभुःतानुवाचोरगेश्वरान् प्रणतान्विनतान्सर्पान्शर्वोरुद्रउमापतिः १६ महादेवउवाच
वक्ष्यश्रवोत्तमायूयंमद्भक्तामत्परायणाः भवत्स्तुत्यातिसंतुष्टोभवतांकष्टनाशकः १७ शिपिविष्टोहमधुनातुष्टोहंभवतांमुदे वृणुध्वंकाद्रवेयावैवरंमत्तोभिकांक्षितं
१८ इच्छाप्रपूरकोनित्यंस्वच्छनामास्मिसांप्रतं निरिच्छानांहृदिच्छांचवांछामच्छांददाम्यहं १९ मच्छासनेनिविष्टानांभस्मरुद्राक्षधारिणां सूतउवाच सदाशिववचःश्रु
त्वानत्वातेभुजगोत्तमाः सहकद्र्वाप्रणम्येशंवव्रुर्वरमनुत्तमं २० साचकद्रुर्महादेवंप्रणम्यपरमेश्वरं तुष्टावाष्टाकृतिंशंभुंशिपिविष्टंकृपाकरं २१ कद्रुउवाच शंभो
विश्वेशमहेशशंभोशशिगरनटिनीजूटकूपेज्वलांगज्वालानेत्राग्निजातोत्तमवरशिरसांमालिकालंकृतांग उक्षांगापांगसंगस्फुरदुरुपदभृद्दिग्गमातंगभंगानंगागाभंगगं
गाजललवकुटिलालोलदिग्भ्रांतमांग पाहीशप्रमथेशचारुकरुणामूर्तेतृणाद्रिस्थितपारावारमहाघसागरतरिश्रीकर्णधारप्रभो २३ पुत्रान्मेशरणागतान्तरणि
जज्वालोरुनेत्रप्रभो पाहीशानदयानिधानअरुणभ्रातुर्भयात्पीडितान् चंद्रापीडमहेशतेचरणयोःभक्तिप्रभाभावितान्नास्त्यन्यत्तवपादयोःशशिकलामौलेशर
ण्यंपरं २४ त्वंमातासिपितासिसर्वजगतांनेतात्वमेवेश्वरस्त्वत्तोमेसुतवंदमेतदधुनाप्राप्नोतुसौख्यंविभो विष्वद्भ्रूगरुडभीतितोनगतिपरंत्वामेवयाचेशिवत्राणा
यभवाधुनाशरणंदत्वतोभिकांक्षेवरं २५ सूतउवाच तस्यास्तत्प्रवचोनिशम्यभगवानुग्रोप्यनुग्रस्तदानागानाहनवोभयंगरुडतोभूयांगजातांहिमे केचित्क
कणंतांभजंतुभुजगाजूटोरुवंधास्तदापादांघ्रिजनूपुरावरमहामालायिताःकंपिमे २६ मत्कंठाभरणाश्चकुंडलवराःसूयंभवेतद्यमे ईश्वरउवाच पातालेनि
वसंतुसंततमुमाकांताश्रयाः शंकरावीरोदारकुमारदारसहिताःकाकोदरामत्पराः दिव्यंमेवरलिंगमद्भुततमंश्रीहाटकेशाभिधंत्वभ्यर्च्यानुदिनंसदेवनिप
तंभस्मांगरागादराः २७ नविष्णुचक्रान्नयमस्यदंडान्नपाशिपाशान्नचशक्रवज्रात् नवोभयंवैभुजगाभवेत्क्वचिन्मत्प्रसादत्संसेवनतोगरुत्मतः २८ सूतउवाच

इत्युक्तं नगजापतेः वरवचः श्रुत्वैव नागाहिनेमात्रातुष्टहृदब्जसद्मवसतिं नत्वोचुरित्थं वचः तान्नागाननुगृह्य देवसहितः स्थानं ययौ तं नगं कैलासं समवाप्य
सोगिरिजया हर्षोरुधाराद्वृतः २९ नागा ऊचुः शंभो त्वं दगवरभूषण त्वो वयं हि धन्याश्च मान्यपदवीं प्रथिताः सुराद्यैः विष्णवादिवंदितपदाब्जवरं तवांघ्रिद्वंद्व
क्षणेन वयमप्यतिधन्यधन्याः ३० श्रीस्कंद उवाच इत्थं संस्तुत्य शंभो वरविवरमहोभूमिपाताल मूलं ईशाज्ञातो विविशुः स्ववशाः भक्तितः पाविताशाः दिव्यं
तत्थाटकेशं प्रथितमणिगणोत्तुंगलिंगं भजंतः कासंतो मुक्तिसिद्धिं किल विलशयकाः शांसवाः शंभुभक्ताः ३१ इति श्रीशिवरहस्ये भीमाख्ये अष्टमांशे
नागोपरि शिवप्रसादो नाम षड्विंशोध्यायः २६ श्रीस्कंद उवाच शेषोपि हाटकेशाख्यं लिंगं शंभोः सदैव हि सर्पैः पातालविवरे पूजयामास भक्तितः १ भस्मरुद्रा
क्षसंपन्नः पंचाक्षरपरायणाः रुद्राक्षमालाभरणो महेशचरणाश्रयः २ कद्रूसुतवरस्तत्र सदा रुद्रजपादरः स्वफणामणिभिस्तत्र कृत्वा शर्वालयं महत् ३ प्राकारगो
पुरोपेतं मणिसौधशतोत्तरं सर्पाणामालयान्येवं क्रमेण परितस्तदा ४ महासौधगणाकीर्णं सप्रतोलिकमुत्तमं नागेश्च नागनारीभिरावृतं तच्चकार वै महेश्वरप्र
सादेन शेषो वै विश्वकर्मणा अशेषभुजगानां च कद्र्वाश्चैव वरालयं ६ लिंगान्यपि सदा परितः स चकार वै तक्षकेशमनंतेशं कंबलाश्वतरेश्वरौ ७ येलापत्रेश्व
रं चैव तथा कार्कोटकेश्वरं धृतराष्ट्रेश्वरं चैव गूलिकेशं भृतीश्वरं ८ शंखेश्वरं पिचंडीशं वारणेशं द्रुतीश्वरं सर्पेशं वामनेशं च खर्वटेशं च वासुकि एतानि दिव्यलिं
गानि स्थाप्य तत्र भुजंगमाः मणिधामगतान्येवं कृत्वा तानि महेशितुः १० पाताले हाटकेशस्य परितो नागसत्तमाः दिव्यपूजाभरैर्नित्यं पूजयामासुरीश्वरं ११ त
त्पूजाविस्तरं वक्ष्ये तत्स्तुतिं च शृणुष्व मे श्रीस्कंद उवाच फणामणिगणव्रजप्रभवगर्भधामप्रभाविराजितसुहाटकोज्ज्वलमहोरुलिंगोत्तमं सुबिल्वदलपंकजैः
कनकचंपकैर्मल्लिकाकदंबकुसुमस्रजाभरवरैः प्रपूज्योरगाः १२ लिंगं हाटकगर्भमंडितमहागंभीरुधामस्थितं दिव्योत्तुंगवृषाढ्यरत्नशिखरद्वारांकितं सु
दरं प्राकारप्रकरैरपारगणनाहीनस्वमौलीलसद्रत्नाच्छच्छविभिः प्रदीपितमुमाकांतालयेषूद्यताः १३ पातालगंगांबुघटीसहस्रधारादिभिः क्षीरदधिप्रभाज्यैः
प्राज्यैर्मधुप्रभवसारघटीसहस्रैः सच्छर्करापूरभरै रहीनाः १४ सन्नारिकेलोदकजंबुनीररंभाफलाम्रप्रभवैश्च पानसैः गंधोदकैश्चंद्रउशीरपाटलातक्को
लकंकोलसुवासितैर्जलैः १५ आसिच्य गंधैर्वरपंचकाद्यैरालिप्य लिंगं सगृहं सुवस्त्रैः सद्रत्नभूषाफणिगोलकांकितैः रत्नैश्च निष्पन्नसुवर्णयुक्तैः १६ तग
रागरुधूपसंभवैर्वरगंधैः मणिदीपकोटिभिः परिफुल्लसुपंकजार्कबिल्वैर्वरमल्लिकाकरवीरजाजिपुष्पैः १७ मरुवदमनस्रजादिभारैः परिपूज्य प्रमथाधि
पोरुलिंगं भुजगा जगतां महेशमेवं वरनैवेद्यभरैश्च भक्ष्यभोज्यैः १८ स्वकृतांबूलदुकूलकूलविहितालंकारसच्चंदनालिप्तं लिंगमुमापतेः प्रियतमं नीरा
जयंति द्विज १९ दीपानां च सहस्रकैर्वरमहाकर्पूरखंडोत्थितज्वालाजालनिरस्तदिक्तमनमंति ते पन्नगाः शंकरं २० हाटककटकोपमा महेशलिंगप
रिसंप्रेक्ष्य मुदानतोत्थरत्नैः स्वफणादिसुंदरेशमूर्ध्निवरिवस्याभिरहो समर्चयंति २१ स्वच्छेंदुधामपरिमंडलसंन्निभोरुनिष्पन्नरुक्मवरदंडसुमंडितैश्च स्व

छत्रपंक्तिवरचामरकोटिलेढिभ्राजत्पताकनिकरैः मजनैरपारैः २२ आदर्शदर्शवरनाट्यमहोत्सवोद्यद्ध्वानैर्जितांबुधिरवैर्वरदुंदुभीनां तत्काहलैर्वरमृदं
गसुशंखनादैः संघोष्य शंकरमहालयमध्यमेवं २३ तौर्यत्रिकैर्दरहरैरिति वैर्भुजंगान्नृत्यंति लिंगसविधेमुदिताः कृतार्थाः श्रीरुद्रवीणायुतवाणिपाणिपद्मप्र
भोत्थैः नखरैर्नखाग्रैः २४ तद्भक्तिरागोत्तमगानधारानाम्नाच शंभोश्च नयंति कालं तद्दंभणसुनीलिमाविधुतकालिमानंकचः प्रकर्षभुजगांगनाः परिलसत्क
पोलश्रियः चलद्दलयमंडनैः प्रथितकुंडलांदोलनैः नयंति किल वीणया शिवमहेशगानादराः २५ तानागाभरणोत्सलिंगसदनेनृत्यंति नागात्मजाः नागास्य
प्रसभोरुकांडसुमहापादझणंनूपुराः पश्येशेतिहरेतिशंकरमहादेवेतिनित्यंसदावीणावेणुमृदंगनिस्वनलयैः सोमोरुधामाननाः २६ शेषोप्यशेषवद
नैर्भुजगोरुभूषं पूषोज्वलाक्षभसितोत्तमभूषितांगं २७ योषार्धकायनवमाषनिकाशकंठं तोषाय शंकरमहास्तुवतिप्रदोषे शेषउवाच द्विजिव्हफणिभूष
णंभसितलिप्तफालेक्षणंसुपंकजदलेक्षणं प्रथितपूजयातोषणं गरोल्बणविशोषणंमदनकालसंहारणंकुरंगशिशुधारिणंसुरवराद्यसत्कारणं २८ मानं
गानंगभंगाधकपुरभगयमहन्पाहिमामीशदृष्ट्वात्वंसेवेत्कुहासस्यप्रभवतिहियथातद्वदीशानशंभो दुःखैरोगादिरोगैरसुतनुव्यसनैरात्तपापंमहेशत्व
सादाज्ञावलोकान्नहिममसुकृतैः लोकसंघैः फलंमे २९ स्कंदउवाच श्रीहाटकेशसमधिष्ठितनागलोकेषापाद्वयंनगरुडादपिपन्नगानां नागानगारि
करवज्रमहोरुधारासंपातनात्त्वसुखिनः शिवपूजयाते ३० इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेशेषकृतहाटकेशार्चनंनामसप्तविंशोध्यायः २७ स्कंदायनमः
हाटकेशंसमभ्यर्च्यशेषोशेषमुखैस्तुवन् रुद्रसूक्तैर्महादेवंसंपूज्यपरमेश्वरं १ बिल्वपत्रांबुजैश्चैवतुलसीलैः कुमुदैस्तथा गंधैश्च धूपदीपैश्चनैवेद्यैर्विविधैरपि २
स्वफणामणिभिर्नित्यंसंपूजयामासशंकरं पंचामृतप्रवाहैश्चफलसारैर्महेश्वरं ३ स्वफणाच्छादिभिर्नित्यंछादयल्लिंगमस्तकं त्रिपुंड्रफालविलसत्सहस्रास्ये
स्तदामुदा ४ सहस्रमौलिमाणिक्यैः शंभोःगर्भगृहंतदा दीपयामासशेषोसावशेषभुजगेश्वरः ५ छत्रैश्चचामरैर्दिव्यपताकादर्शवाद्यकैः नागकन्यानर्त
नैश्चवीणादिध्वनिभिस्तथा ६ स्तुवंतिगानधाराभिः नागकन्यामहेश्वरं अस्तदोषप्रदोषेसौनित्यंसंपूजयत्स्वरं ७ एवंस्तुवन्नुवासासौशेषोभुजगमः सुखं॥
सहमात्रामुदातत्रहाटकेशंप्रपूजयन् ८ चक्षुःश्रवास्तेश्रृण्वंतिशिवनामसुधारसं चक्षुषैवहिपश्यंतिपूजितंलिंगमीश्वरं ९ सहस्राक्षोप्ययंशेषोधन्यैः
स्वैर्नेत्रमंडलैः वीक्ष्येवहाटकेशाख्यंसर्वांगोत्फुल्लकंटकः १० एकैकास्येननाम्नैकंबिल्वैः संपूजयत्स्वरं नाम्नांसहस्रैरीशानंविश्वेशंकरुणाकरं ११ सतो
तिविवशोनित्यंपन्नगः सन्नगोत्तमः सचक्षुःश्रवसाराजासहस्रपरिवत्सरं १२ वाय्वाहारःसदाशेषो अशेषवदनैस्तुवन् भक्त्यावरदेवदेवेशंससमीरणपारणः १३
समाकर्णयविप्रेंद्रतत्स्तुतिंसावधानतः शेषउवाच सुरवरंतटिनीजटोत्तमांगस्फुरदुद्यद्विशदवरांकचूडं अकपटवचनोत्तमृग्यपादंकररिलक्रूपटहाटक
धूर्जटिंभजामि १४ वरहाटकयुक्तगौरीशनटमाशास्यमुमासहायं निटिलानलदग्धकामकालंचतुलंहरहाटकधूर्जटिंभजे १५ पटुवटुमुनिभिःनिषेव्यमाणं

वटतटकेद्धतोरजंमहेशं अघटनघटनापटीयमायानमसः पाटनहाटकेशमीक्षे १६ तटिन्निभजटाकुटीविघ्नतसामिसोमप्रभाविभासितजगत्रयंस्फुर
द्भुपीटनेत्रोज्वलं वटस्थमगजापतिंकरटिद्धतिभूष्णत्कटिंसुघोटकद्धनागमंसरभसंभजेधूर्जटिं १७ आसत्यलोकावधिमौलिमेनत्पातालमूलंवरशंगलिं
गं श्रीहाटकेशंभजवेदमौलिजालैकवेद्यंभुजगांगभूषं १८ सूतउवाच एवंशेषस्तवंकृत्वातल्लिंगोत्तुंगमौलिनः निर्गत्यार्कसहस्राभोउमयावीक्षतंहरः
काकोदरमहाहारोहरःसर्वमहेश्वरः ललाटपटलोद्भासित्रिपुंड्रकुटिलालकः २० स्फटिकाचलसंकाशः कुटिलांतरदुःखदः चटुलाननकंजाक्षःक
रटित्वकयोहरः २१ महानटोत्थविकटोह्यट्टहासगिरावदत् हरउवाच तवस्तुत्यानयाशेषस्तविशेषणयास्तुतः अशेषभूमिधरणेसामर्थ्यंतेददाम्य
हं २२ विश्वंभराधरोसित्वंसदाविश्वाधिकार्चनात् शंभवोसुरगश्रेष्ठनतेभारोभवेद्भुवः २३ इतिशंभोर्वचःश्रुत्वाफणिराजःप्रणम्यतं उवाचविनयोदा
रंकाकोदरधरंहरं २४ शेषउवाच कांक्षेक्षतंतवविभोपदभक्तिभावंकाकोदरैश्वनदुरोदरवत्सुरादीन् नष्टान्त्रिविष्टपगतानपिभक्तिनिष्ठानेष्टधुनातव
पदंशिपिविश्वमिष्टं २५ अस्माभिरेतदमलंशशिधामचूडमीड्यंचवेदशिखरैर्हरहाटकाख्यं लिंगंसुमंगलदमंगलयासमेतमाजीव्यमेनदमलंपशुपाश
मुक्त्यै २६ किंवालोकेनुलोकेनिगमशिखिशिखाभारकारगृहोद्यन्मारापारशरातुराःसुखराभाराभुवःकेवलं वीरोदारकुमारवाचिचतुराःसंसारवार्त्ता
रसाःस्वाराज्यंशिवपादपंकजवरंनाराधयंतिक्षणं २७ इत्युक्त्वागिरिजामनोहरवचःश्रुत्वादिशेषोहरंनत्वाहश्रुतिवीक्षणोथभगवन्वाज्ञांकरिष्येतव २८
कोभारोममतेपदाब्जयुगलंचित्तेनसंबिभ्रतःशंभोसर्षपवद्वहामिशिरसाकांक्षेद्यभक्तिंतव २९ नागानागाजिनांगनगशिखरमहाचारुचापांघ्रिरेणुं
मूर्ध्न्याधायधन्यामदमुदितधियःतस्थुरिच्छाविहाराः हाराःकाकोदरास्तेहरपदवरहृध्यानधारानुसाराःवीरोदारकुमारदारसहिताःशंभुप्रसादादराः
३० श्रीस्कंदउवाच एवंवलंविलेशयेशवरस्यदत्वावालद्विजावनकरोवलएवशंभुः वलप्रमथनार्चितोवलिसुतार्च्यलिंगालयोययोद्भुतमुमाधवो
वरभुजंगहारोज्वलः ३१ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेशेषस्यशिवप्रसादोनामअष्टाविंशोध्यायः २८ स्कंदउवाच पातालमूलेदेवेशंपूज
यंतिविलेशयाः भस्मरुद्राक्षसंपन्नाःशिवध्यानहताशुभाः १ गूढपादामृडध्यानाद्दृढभक्तिरताःसदा वासुकिप्रमुखाःसर्वेतक्षकाद्याश्चभोगिनः २

तक्षकेशं तक्षकोपि संपूज्यांबुजबिल्वजैः गंधधूपैश्च दीपैश्च नैवेद्यैर्विविधैरपि ३ नीराजनाद्यैर्नीरैश्च नागकन्याकृतैस्तदा संपूज्य स्तौति हृष्टात्मा तक्षकेशं स तक्षकः ४ तक्षक उवाच शंभो विरिंचिवरमौलिकपालपाणे चंचत्सुधांशुमकुटोज्ज्वलितोत्तमांग मां मोचयाशु दुरितात्परिवंच केशदेव त्वमेव भगवांश्च कुलुंचनाथ ५ मृडं दृढतरं हृदा सदयमिंदुचूडं सदा भजामि भसितोज्ज्वलं हृदयपद्मसद्मांतरे भुजंगवरकंकणांक्कणननिस्वनांघ्रिप्रभाविभासिनटनानतजगद्दुदारसत्तांडवं ६ सूत उवाच वीक्षाशिक्षितमन्मथं सुरगणाध्यक्षं महोक्षप्रियं पक्षींद्रप्रियवाहवीक्षणलसत्पादांबुजं शंकरं भक्षीभूतविषं सुदक्षमथनं भिक्षुप्रियं तं सदा चक्षुःश्रोत्रवराश्च तक्षकमुखाः संपूजयंतीश्वरं ७ अनंतेशमनंतोपि बिल्वैः संपूज्य भक्तितः गंधपुष्पैश्च विविधैर्नैवेद्यैरपि शंकरं ८ धूपदीपैर्गगनानानारत्नैः स्वफणामणिभूषणैः लिंगमालिंग्य भोगेन भोगिवर्योस्तुवत्स्थिरं ९ अनंत उवाच भस्मांगरागघृतवालकुरंगसंगफालस्फुलिंगहरनेत्रपतंगलिंग गंगातरंगमहदिंदुकृतोत्तमांगमानंगकृत्तिभुजगांगदहारपाहि १० पापानेनमनेनमनंगभंगसुमहालिंगस्य शंभो सदा शं गांगस्य महोक्षसंगभरितानंदांग गंगाधर मां पाह्यघहरांधकस्मरहरामेयप्रभो शंकर विश्वाधीश्वरचंद्रशेखर विभो कारुण्यदृक्संगतः ११ कंबलाश्वतरेशानं कंबलाश्वतरौ सदा सदापूजयतः शंभुं बिल्वमंदारपंकजैः १२ तुष्टुवाते हि भुजगौ तल्लिंगं भक्तिभावतः कंबलाश्वतरावूचुः भवगदशमनाद्य वैद्यवेदप्रतिपाद्येश्वर विद्यया भिवेद्य त्वं पर्णशय्यसहमानमहेश्वराद्य आलाद्य सर्वतनुगोपि अभेद्य शंभो १३ तं कंबलाश्वतरगीतसुसामसोमश्रीवामदेववरसामरथंतरेड्यं श्रीसोमकेशमुमया परिपूज्य बिल्वैस्तौ तुष्टुवाते भुजगौ महेश्वरं १४ एलापत्रेश्वरं लिंगं एलापत्रोरगेश्वरः संपूज्य बिल्वैः स्वफणामणिमालोपहारकैः १५ स्तौति देवं सदा भक्त्या फणाभृल्लिंगमीश्वरं एलापत्र उवाच वंदे कुरंगकरसंगभवोरुभंगं भस्मांगरागितमनंगमतंगभंगं गंगातरंगविलसज्जटिलोत्तमांगं श्रीलिंगमेनदगजाहृदयांतरंगं १६ एलापत्रस्त्रिनेत्रं स्वकफणिविलसत्थन्यगात्रोरुवेष्टैः तल्लिंगाकंठलग्नो विघटनवफणारत्नसंछादितश्रीः बिल्वैश्चंदनलेपसुंदरमहाकायैश्च शीतैः शिवं संतोष्यानुदिनं वसत्युरगपः पुण्ये प्रदोषेपि च १७ कार्कोटकेश्वरं भक्त्या नागः कार्कोटकोर्चयन् बिल्वमंदारपुन्नागचंपकाशोकपंकजैः १८ धूपदीपोपहाराद्यैः स्तौति शर्वं महेश्वरं कार्कोटक उवाच श्रीनीलकं

ठसितभस्मवराव कुंठवेकुंठनेत्रार्चितपादपद्म उत्कंठभाउकहृदापरिचिंतनीयपादांबुजे परिलुठामिचसन्नकंठः १९ धृतराष्ट्रेश्वरंभक्त्याधृतराष्ट्रोभुजं
गमः विल्वपंकजमंदारपुष्पैरभ्यर्च्यशंकरं २० नैवेद्यैर्धूपदीपैश्चनित्यमभ्यर्च्यशंकरं स्तौतिप्रांजलिरीशानंस्वफणामवनामयन् २१ धृतराष्ट्रउवाच हरहरगर
कंठपार्वतीशत्रिदशामेयगुणाकरप्रसीद हरहरशितिकंठसामिसोमोज्वलितोत्तंसयमींद्रचित्तहंस २२ गुलिकोपिसदालिंगमर्चयन्गुलिकेश्वरं विल्वैः
फणामणिव्रातैःधूपदीपनिवेदनैः २३ अभ्यर्च्यस्तौतिहृष्टात्मासुलिंगंसर्पपुंगवैः गुलिकउवाच सशंखचूडःशशिचूडमीशमीडेसदावेदवचोभिरेवं
भस्मांगरागछविसन्निकर्षाद्धिकर्षपत्येवततोंधकारं २४ देवदेवपरमेश्वरशंभोविश्वनाथममनाथसनाथं मांकुरुघ्वदययाघनयात्वंमन्मथांतकविभोश
शिचूड २५ शंखचूडेश्वरंलिंगंशंखचूडोर्चयन्सुमैः विल्वांबुजैःसदाभक्त्याभुजंगोभस्मभूषणः २६ नैवेद्यैर्धूपदीपैश्चनृत्यन्संस्तौतिभक्तितः शंखचूडउवाच
शंभोकंदर्पसर्पज्वरहरपरहन्पाहिमामीशदुःखात्दुर्वारखर्वगर्वंजनिमृतिविवशंरोगपापादियुक्तं २७ कल्यानल्पजलोद्भवोद्भवमहास्रक्शोभिलुठंतंसदा
तन्मौलिस्रगलंकृतांगकमहालिंगोत्तमांगप्रभो पिचंडेश्वरएकंचवरिवस्याभिरेत्तदा स्तौतिदेवंसमभ्यर्च्यनागाह्यानंदतुंदिलः २८ पिचंडिलउवाच
मत्ताजस्रगलंकृतांगकमहाभूषाहिपूषोज्वलन्नेत्रोन्मेषनिमेषशोषितजगत्तोषेंदुचूडोज्वल पाहीशत्रिदशोत्तमोत्तमसदासोमेकसीमास्तुतकामा
गप्रहरावकामदसदामांवामदेवप्रभो २९ वारणोद्युरगेंद्रोसौवारणत्वमसार्चकः निवारणकरंदेवंपापानांकारणंपरं ३० वारणेशंसदाभ्यर्च्यविल्वा
पचितिकल्पनैः मरवारणवक्त्राद्यपुत्रंसंस्तौतिभक्तितः ३१ वारणउवाच पाहींदुद्युतिजूटदेवतटिनीगर्वादिनिर्वापण त्वंकल्याणनगात्तसन्कर
धनोजेताजगत्कारण ३२ भस्माहीनसुभूषणोत्तमसदाकामांगसंहारणसर्वप्राणहरांतकप्रहरणामेयांघ्रिपद्मारुण द्युतीशंद्युतिकोनागःसंपूज्यप्रम
थाधिपं ३३ विल्वमंदारकंजादिमालाजालोमलैरपि स्तौतिप्रसन्नहृदयःफणिराट्फणिभूषणं ३४ द्युतिकोवाच रमासंहननार्धकायविलसत्सोमो
ज्वलन्मूर्धकधूमोद्दामशिरःकपर्दसुमहस्थूमांकनेत्रोज्वल भूमानंदघनप्रसीदभगवन्त्वंव्योमकेशस्तुतेः सीमासंस्तुतपादपद्ममममहत्कामप्रदाव
प्रभो ३५ सर्पेशंवरसर्पेशःसंपूज्यश्रीफलच्छदैः निवेदनैर्धूपदीपैःसंस्तौतिपरमादृतः ३६ सर्पउवाच शिवार्चितसकलकष्टहरंप्रकृष्टमोक्षप्रदंकि
लसदाशिपिविष्टलिंगं अष्टाकृतिंचभजतांनहिदुष्टभावोनष्टाशुभाभुविभवंतिसदैवसर्पाः ३७ वामनेशंतत्रलिंगंवामनोभुजगोत्तमः विल्वांबुजैः
समभ्यर्च्यसंस्तौतिपरमेश्वरं ३८ वामनउवाच उच्चैर्ध्रोषादिशेषक्षितिधरवरधृक्पोषितांशेषलोकसृष्टिस्थित्यंतकार्येप्यतितरमनिशंजागरूकप्रभोमां

वेदांर्चोन्नमहेषघोषितपदांभोजप्रभाभावतोवेषाकारमिदंसदात्रिभुवनंमन्येकिमन्यैर्नमे ३९ खर्वटेशंखर्वटाख्योनागोभ्यर्च्यसदंबुजैः बिल्वपत्रैःसदे
शानंसदाविलशयोत्तमः ४० स्तौतिवेदांतवाग्गुम्भैरंभोजैःपूज्यशंकरं खर्वटउवाच त्वद्वीक्षाभीषितास्तेसुरवरनिकराःचंद्रसूर्यानलेंद्राःत्वद्भासाभास
तेदंजगदिदमखिलंलोकजालैर्महेश विष्णुब्रह्ममरुद्गणादिजनकःसोमोसिसर्वोत्तरः कस्त्वांस्तौतिमहेशसर्वतनुभाक्त्वंनिर्गुणोस्यव्ययः ४१ वासु
किर्वासुकीशानंविल्वैरभ्यर्च्यशंकरं संस्तौतिहृष्टोनियतंकुंडलीशोमहेश्वरं ४२ वासुकिरुवाच क्षयद्वीरकाकोदरापारहारस्फुरत्तस्फारकर्पूरगौरावहीर
प्रभाकारतारेंद्रसन्मौलिगंगारयोल्लासिलीलालकाजालमालाईतांजोत्तमांगाब्जनेत्रार्चिताङ्घ्रिद्वयानंगभंगपतंगस्फुलिंगात्तफालप्रभाजालनि
र्मूलितालोलपाशान्तकालत्रिलोकाकुलाकारमारमथासारसंहारउद्धृतहृत्त्रैपुराकारगंगाधरोमेयमातंगचर्माम्बरानीलदलाकारकंठस्फुरत्सांद्रगो
रीकुचाश्लेषणागाढप्रभावांगसंजातसत्कंठकांकप्रभोपाहिमां ४३ एवंसंस्तुत्यतेसर्पाःकंदर्पहरमीश्वरं पातालेदिव्यलिंगेषुहाटकेशादिषुद्विज ४४
वदंतिनियतंत्वेवंभुजंगाःशांभवोत्तमाः सर्पाऊचुः अस्माकंकुलदेवतंशशिकलाजूटानुकूलोद्यतंस्फाराकारभुजंगहारवलयालंकारलिंगोत्तमं
घ्येयीभूतमहागमान्तशिखरंजूटीकृताहीश्वरंपाथोरद्रवसारचंदनलसत्कोटीरमीशेमहि ४५ स्कंदउवाच एवंसर्पेश्वरास्तेस्वफणमणिगणैरिंदु
चूडोरुलिंगंविल्वैर्मंदारपुष्पैःहरिहरविधिभिःपूजितंशंकरांघ्रिं स्वैर्भोगैश्चभुजंगमेश्वरमहालिंगोत्तमांगोज्वलत्सोमोत्तंससरिद्भवोद्भवमहाशीतादि
वाताशनाः ४६ सर्पाःपर्वतनंदिनीसहचरंसंपूज्यविल्वच्छदैरच्छैःस्वैःस्वैर्मणिभिर्विदीपिततमःस्तोमंमहेशालयं कुर्वंतिप्रसभंप्रदोषसमयेश्रीहाटके
शार्चकाःतेनैवस्वकदेहजत्वचमिषात्पापादिनिर्मुच्यतेतिष्ठंतीश्वरगात्रभूषणवराःसौख्येनपातालगाः ४७ लीलाकारकृतानतेषुगदजापीपीडानमृ
त्युद्भवानोजन्मादिभयंजरादिकमहोकद्रुद्रुसंसेचनात् एकेनाक्षियुगेनदिव्यगिरिशालंकारलिंगोत्तमंवीक्षंतिश्रुतिसारशंकरकथांशृण्वंतितेकद्रुजाः
४८ पातालेनिगलोपमेपिदितिजाःश्रीकालकालार्चकाःमालेंद्रागरलाशिशंकरमहालिंगार्चकाःशांकराः फालाक्षंगलसत्त्रिपुंड्रसुमहारुद्राक्षमालाधरा
धीरोदारकुमारसहिताःकाकोदराःशांकराः ४९ पातालेष्युरगेश्वरप्रभृतयःशेषाद्यशेषाःशिवलिंगेषुप्रथितेषुहाटकमहालिंगंसकाकोटकाः त्रुट्यता
तकसंततिःस्वकफणामाणिक्यपूजादिभिः विल्वानांप्रकरैःसदंबुजवरैःपुष्पैश्चदीपादिभिः ५० कर्पूरागरुसंभवैःसमधुरसामोदैश्चनित्यंशिवंसंपूज्यैवबसं
तिगूढपदकाःदार्ढ्येनशंभोःपदं ध्यायंत्येवसदानुरक्तहृदयाःसर्पाविरक्ताःसदालिंगंनहृद्धाटकेशमुमयापश्यंतिचक्षुश्रवाः ५१ इतिश्रीशिवरहस्येअंशेमांशेभीमाख्ये

सर्वनाशकृत्पाताललिंगपूजानामएकोनत्रिंशोध्यायः २९ स्कंदउवाच दिग्गजाअपितेचाष्टौअष्टमूर्तिकृपाकरः स्वनाम्नास्थाप्यलिंगानिस्वपु
ष्करजलांबुजैः १ स्नात्वापातालगंगायांस्वशुंडावलयोद्धृतैः स्वर्णकुंभोधृतांभोभिः धृतगंडत्रिपुंड्रकाः २ धृतरुद्राक्षकवचाः कृष्णारूपेणतेगजाः पू
जयंतिचलिंगानिस्वस्वांदिशिगजोत्तमाः ३ गजचर्मांबरधरंतानिवक्ष्याम्यनुक्रमात् ऐरावतःपुंडरीकोवामनःकुमुदोंजनः ४ पुष्पदंतःसार्वभौमःसुप्र
तीकोथदिग्गजाः पूर्वतैरावतोभातिश्वेताद्रिरिवजंगमः ५ चतुर्दंतोमहाकायःकरेणुकलभावृतः मदधाराकटोल्लासिभ्रमद्भृंगशतावृतः मणिधाम
गतंकृत्वालिंगमैरावतेश्वरं संपूज्यविल्वमंदारैःधूपदीपनिवेदनैः ७ स्तौतिचोद्धृत्यशुंडाग्रंमुंडमालाधरंहरं ऐरावतउवाच शांतशंकरसंतकांतक
मुमाकांतभजाम्यनिकंस्वांतानंतमहांतकोद्भवभयंकिंवोपलक्ष्मम विश्वाधीश्वरशाश्वतांधकहरापारस्मयासंहरघोरापारभवोरसागरगदापारादिदुः
स्त्वंहर ८ एवंसंस्तौतिहृष्टात्मासदेवाभ्रमुवल्लभः पुंडरीकस्तथाग्नेय्यांकिंजल्कसदृशच्छविः ९ उर्णयाथकरिण्यावैकलभैरपिसंवृतः चतुर्दंतोमहाका
यःमदप्रस्रवणाघहृत् १० पुंडरीकेश्वराख्यंतदाग्नेय्यांमणिधामगं प्रतिष्ठाप्यमहालिंगमभिषेंद्रोभीमभीश्वरं ११ पुंडरीकेश्वविल्वैश्चस्वशुंडावलयोद्धृतैः
समर्चयित्वासंस्तौतिवृंहितैर्घोषयन्सदा १२ पुंडरीकउवाच पाहित्रिनेत्रसुचरित्रपवित्रपात्रपाह्यब्जमित्रनयनामलभूतिगात्र मामीशशंखधवलें
दुकलाललामपाहीशमामकधिकयासकलेषुमित्र १३ एवंसंस्तौतिचभुवंधारयन्समहागजः वामनोदक्षिणेतिष्ठत्युद्यत्कुंभोमहेश्वरं १४ कर्णाग्र
चामरोल्लासमदगंधांधदिक्तटः वर्णेनकर्बुरोविभ्रमद्भृंगपासकलभैर्वृतः १५ वामनेशाभिधंलिंगंमणिधामगतंतदा कृत्वाविल्वांबुजैःपूजयवारणः
पापवारणं १६ शुंडामावृत्यदंताग्रेस्तौतिदेवंसदिग्गजः वामनउवाच पाहींदिरारमणकारणतारणेडाचक्षुश्रवाभरणहारणकालकर्णो मारांगसंहा
रणपापनिवारणेशपाहींदुभूषणमहेशगणाग्रगण्य १७ एवंसंस्तौतिनियतंदिशःस्तंबेरमोहरं नैरृत्यांकुमुदोपीशंकुमुदोत्पलभासुरः १८ वर्णयाक
लभैर्युक्तोकुमुदेशंमहेश्वरं मणिधामगतंकृत्वापूज्यविल्वोत्पलैर्गजः १९ विकसनयनेकेर्णोभक्त्यास्तौतिमहेश्वरं कुमुदउवाच हेदेवदेवजगदी
श्वरपंचवक्त्रविश्वंभराधरणभूषणभीषणेश गौरीमनोरमणसर्वशरण्यशंभोआतार्यतारणविभोचरणंनतोस्मि २० अंजनःपश्चिमेभातिपद्मीश्री
पद्मसंनिभः वारणाकलभैर्युक्तोचतुर्दंतोमदस्रवः २१ अंजनेशाभिधंलिंगंमणिधामगतंगजः पद्मैर्विल्वोत्पलैर्भक्त्यामंदारार्जुनचंपकैः २२
निवेद्यफलमूलादिअंजनःस्तौतिशंकरं अंजनउवाच सरसीरुहनामनेत्रवंद्यस्फुरशंवरवैरिलांछनांग भजभजशिवदंशिवाघवंत्वांभवभव
मभयायचेतसात्वं २३ पुष्पदंतोथवायव्यांधारयन्शिरसाभुवं अतसीपुष्पसंकाशःपुष्पिण्याकलभैर्युतः २४ पुष्पदंतेश्वरंलिंगंमणिधामगतंतदा

शिवरहस्यअं॰ विल्वमंदारपुंनागचंपकैरर्च्चयंतिरद् २५ संस्तौतिनियतंभक्त्याकुंभसंस्थभूतलः पुष्पदंतउवाच कुरुकुरुकरुणांशशिद्युतीडपप्रेथितानंगमतंगभंगमी
अ०३० शं सुपतंगहगंगतुंगागंगासुतरंगोघजटंभजामिशंगं २६ एवंसंस्तौतिनियतंद्विरदःसुरसत्तमं सार्वभौमोगजेंद्रोसौपाटलीपटलारुणः २७ पाटल्याकलभैर्युक्तः
सार्वभौमेश्वराभिधं मणिधामगतंलिंगंविल्वाब्जैःसदार्चयन् २८ संस्तौतिशुंडामुत्क्षिप्यदेवेंडहरमीश्वरं उत्तरेधारयन्पृथ्वींकर्णतालेर्मदोत्थतैः २९
२६ सार्वभौमउवाच शंगंसंगहरंमहेशमनघंमातंगचर्मांवरंगंगातुंगतरंगरंगितजटाभारंभुजंगांगदं मधुमथनाक्षपादांबुजंमहेशंभजशंभुंसकलाद्यविश्व
नाथंप्रमथानांशिवमेकमनाथमीशं ३० सुप्रतीकस्तथेशान्यांसुप्रतीकेश्वराभिदंधं लिंगंमणींद्रसंज्ञप्रदिव्यधामगतंगजः ३१ प्रतीक्याकलभैर्युक्तोगौरवा
र्णोमहाबलः संपूज्यविल्वकमलैस्तथानीलोत्पलैरपि ३२ निवेद्यफलमूलादिदंतावलवरोहरं संस्तौतिभरितानंदोमदधाराकटश्रवाः ३३ सुप्रतीकउवाच
श्रीकालकालजितसर्वदितिप्रसूतपातालमूलपदखेलनविश्वलील पाह्यब्जजाच्युतशचीधवपूजितांघ्रेगौरीमनोहरविलाससनिधानशील ३४ एवंदिग्गजव
र्यपूजितमहालिंगानितुंगानितेप्रोक्तान्युत्तमभोगिलोकतिलकालंकारसत्याटकं लिंगंशंगमुमापतेःप्रियतमंसंपूजितंवास्मृतंचित्तेचिंतितकामदंकिलमहापा
पौघसंघैकभित् ३५ सूतउवाच नैतच्चित्रमहोत्रिनेत्रचरणांभोजप्रभाभावतःचित्रंचापिजगत्स्वचित्रितमिदंभात्यत्नरंगेसम किंसत्रावभृथाप्लवैःवरगवांदानैः
महीदानतोतुंगाश्वेभवरान्नराशिसुमहादानैःव्रतैश्चापिकिं ३६ योवाकोवापिशंभुंभजतिभुविनरःकिंन्नरोवासुरोवामारापारशराभिघातरहितोभूभाररूपाः
परे धन्योमान्योहिमन्युप्रभृतिगुणगणश्रेष्ठतामाप्नुयात्साविद्योतद्युतिरिंदुकुंदधवलप्रेमास्पदंगोभवेत् ३७ वरंरासभोवावरंसूकरोवावरंजारचंडालकन्या
समेतः वरंपामरोवानरोवासुरोवाहरापारलिंगार्चनावर्जितोचन ३८ उद्भिज्जानिचजारुजानिचमहाभूतानिचांडोद्भवान्याहत्तान्यसकृन्महेश्वरमहाधाम्ने
वतानिद्रुत संस्थाप्यप्रतिमप्रभावविहितेवेदांतवेद्येहरेहाराएव्रविलीयनप्रतिभवंयांत्येवशर्वाश्रयाः ३९ उत्क्रांतिक्रांतदेहाक्रमभ्रमणमहाघोरसंसारचक्रे
नक्रप्रायारुदाराधनसुतवदनभ्रांतिसंभ्रांतदेहाः ईहामोहेर्ष्ययायेद्रुतगतिभृतिभिर्नाशजन्माद्यवस्थाःसंस्थातुंमन्वतेयेप्लमदुदरदरीपूर्तयेतिप्रमूढाः ४०
स्कंदउवाच एवंदिग्गजमौलिधारितमहीमीशार्चनायोद्यताःशुंडादंडविमर्दितांडकटभिन्नघोरोरुसद्धुंहितैः उच्चैर्घोषपरायणाःगजवराःदंतित्वगाशावरं
संपूज्यप्रमथाधिनाथमगजाकांतंगजास्तेसदा ४१ भीमांशः कथितोष्टमोष्टतनुकश्रीपादपद्मार्चकैः श्रोतव्यःसकलाघशैलभिदुरोमारारिभक्तिप्रदः
श्रीदेवेकथितोमहेशवदनात्तत्तुभ्यमुक्तोमयाकिंभूयःपरिपृच्छसेत्तवमुदातद्ब्रूहिशैवाग्रणे ४२ इतिश्रीशिवरहस्येभीमाख्येअष्टमांशेत्रिंशोध्यायः ३०
इतिश्रीभीमाख्यअष्टमांशःसमाप्तः श्रीमहन्तहरईश्वरस्वामीतदशिष्यश्रीमहन्तवीरभद्रस्वामीकेआज्ञानुसार भयरोपाध्य यहपुस्तकेलिखितं सं०१९३८॥ रामः २६